एकांकिका संचयनम्

Digitized By Siddhanta eGangotri Gyaan Kosha

(अगस्त्यदत्तात्रेयनरनारायणपाणिनिकात्यायनपतञ्जलीनां
संक्षिप्तदिव्यचरितम्)

रचना संकलन च

श्री नारायण रथः

(बि. ए. अनर्सः)

पुडिआसाहि, पुरी

१९९४

मूल्य— रु २८-००

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

मङ्गलाचरणं सामान्यकथनं च

नमामि विश्वप्रणवस्य नित्यं
कान्त्यारुणं तत्चरणारबिन्दम्
बादे विषादे बिपदि प्रवासे
तूर्णं प्रशान्तिं स्मरणात् तनोति ।

पाणिनिकात्यायनपतञ्जलिव्यतिरिक्त बर्णितव्यमहापुरुषाः पौराणिका अपि एकदा अत्र भारतबर्षे मांसरक्तमयशरीरं गृहीत्वा लीलां कृतबन्त इति मे बिश्वासः। ईश्वरकल्पानां तेषां चरितं पुराणेषु सबिस्तरं वर्णितमपि अत्र पुनःकथनात् जिह्वापाबित्र्यमानयनेन सह कदाचित् आलोकतिरस्करिण्यां प्रदर्शितं चेत् परमानन्दस्य प्रभवं भबिष्यतीति बुद्ध्यायमारम्भः। अरमणीयता क्षन्तव्या एवास्मिन् प्रयत्ने बिद्वद्भिः। खीष्टं प्रसूय मेरी कन्या एवासीत् चेत् अगस्त्यस्य कुम्भसम्भवत्वं कथं न बिश्वसनीयं ?

इति

लेखकः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

सूचीपत्रम्

१म पुष्पम्	—	महर्षिरगस्त्यः	पृ १
२य पुष्पम्	—	अवधूतः दत्तात्रेयः	३६
३य पुष्पम्	—	महामुनी नरनारायणौ	६३
४र्थ पुष्पम्	—	त्रिमुनिस्मरणम्	८९

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

महर्षिरगस्त्यः

सूत्रधारः— ज्योतिःस्वरूपेण यतो बिभासि
शरत्प्रदोषे दिशि दक्षिणायाम्
नभः प्रसारे भगवन्नगस्त्य
द्रष्टुं प्रसीद कृतपूर्वलीलः ॥

दक्षिणाकाशमालोकयतः भाद्रपदनिशायां प्रकाशमानस्य अगस्त्याख्यनक्षत्रस्यान्तराले दिव्यवपुषा वर्त्तमानस्य भगवतः महर्षेरगस्त्यस्य प्राक्तनमर्त्यशरीरेण आचरिताः अद्भुतलीलाः दर्शितुकामाः वयमत्र उपस्थिताः तदाशिषा रञ्जयितुं तज्जनक्षितिमिदं पुण्यं भारतवर्षं यद्भवन्तः द्रष्टुःमर्हन्ति श्रद्धया ।

(१म दृश्यम्)

(वरुणालये उर्वश्या आगमनं सखीभिः स्नानंच क्षीरसागरे)

उर्वशी — सख्यः ! रमणीयेऽस्मिन् क्षीरसमुद्रतोये स्नानात् शुद्धा सती आदित्ययज्ञदर्शनाय गन्तुमिच्छामि ।

१म सखी— एवं कृते का हानिः ? परन्तु सखि ! त्वद्बिधानां पीनपयोधराणां रमणीनां निर्जनेऽत्र क्षीरसागरपयःसु उन्मुक्तस्नानं जगन्मोहनाय एव ।

उर्वशी — सर्वाः देवता आदित्यस्य यज्ञे निविष्टाः । मर्त्यवासिनां आगमनं न सम्भवत्यत्र न च राक्षसानां

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

बिष्णोः प्रभावात्। तस्मात् एहि सखि! निर्भयं यथेच्छया स्नानं करिष्यामः तरङ्गखेलासु। नक्तं मित्रेण आमन्त्रिताहं क्रीडार्थं। अतः अपराणां नास्त्यवकाशः। (वरुणस्य प्रवेशः)

वरुणः — (दूरात् वीक्ष्य) इयं रूपसम्पन्ना पद्मपलाशनयना चन्द्रानना रमणी उर्वशी एव। जलतरङ्गेषु क्रीडन्त्याः अस्याः दर्शित ङ्गायाः स्पष्टयौवन मनो हरति मे। अहो कलध्वनिरिव मधुस्वरो रमणीनां। एतासु उर्वशी चन्द्र इव तारागणेषु शोभते एव। अधरे मधुहासः, नयने मुक्तकटाक्षाः, असंयत केशपाशः मुखशोभां बर्द्धयन्त्यपि। जलसिक्तं बसनं तनौ लसत्येव। सर्वथा धैर्य्यंधारयितु-मशक्तोऽहं।

(गत्वा कथयति। क्रीडन्तीनां संयमः)

नार्य्यः — अत्रापि पुरुषः। देबा अपि असभ्याः संजाता अतीब कामपरतन्त्रत्वात्। तस्मादेव राक्षसानां पीडा तेषामुपरि काले काले स्वर्गबिजये सुखलोभात्। उर्वशि! गच्छ वरुणस्य समीपं त्वदर्थमेव तद्वार्त्ता। एवं उन्मुक्तयौवनायां त्वयि जलक्रीडारतायां पुरुषो नाम को वा न मुग्धः स्यात्। निराकारोऽपि रूपपरिग्रहात् त्वां रंस्यत्येव। (उर्वश्याः जलादागमनम्)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

बरुणः — उर्वशी ! त्वद्दर्शनात् मनो मे सहसा क्षुब्धं संजातं। त्वां बरयामि मैथुनाय।

उर्वशी — नैवं सम्भवति। प्रागेव मित्रेण बृतोऽहं। त्वयि मे प्रीतिरधिका बर्त्तते एव सर्वदा। परन्तु अद्य देहो मित्रस्यैव। नैव कालक्षेपः करणीयः मया आलापेन। कुपितो मित्रः शापं दास्यति। एष आगच्छति मित्रदेवः।

(बरुणस्य अन्तर्द्धानं। मित्रस्य प्रवेशः)

मित्रः — दुराचारिणि उर्वशि ! पूर्वं मयामन्त्रितापि कस्मात् त्वं पतिमन्यं बृतवती मनोबचोभ्याम्। अनेन दुष्कृतेन याहि मनुष्यलोके पुरुरबसः समीपं। स एव ते भर्त्ता कालाय।

(उर्वश्यादीनां दुःखेन प्रस्थानम् बरुणस्याबिर्भावः)

बरुणः — मित्रदेव ! यज्ञीयकुम्भात् बासतीबराभिधानात् उत्पततः पुरुषौ महातेजसौ। कुम्भायतनं मानमस्याद्योत्पन्नस्य शरीरस्य। तस्मात् मान्यः अस्य नाम स्यात्।

मित्रः — अगः कुम्भे तत्र स्त्यानः संहतः तस्मात् अगस्त्य इत्यभिधानेन प्रख्यातो भविष्यत्येव।

वरुणः — पश्चादयमपि अगस्त्याभिधानस्य सार्थकतां प्रतिपादयिष्यति अगं बिन्ध्याचलं संस्तम्भ्य तपःशक्त्या।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अगस्त्यः — वरुणदेव ! नाहं तव पुत्रः ।

मित्रावरुणौ—अपरपुरुषस्तु महातपाः वशिष्ठ एव ब्रह्मणः निदेशात् नूतनदेहं गृहात्यत्र । अगस्त्य । उभावपि मैत्रावरुणिः इत्यभिहितौ भविष्यतः कुम्भे अस्मद् निक्षिप्तवीर्य्यसम्भवात् ।

(वशिष्ठमित्रवरुणानां तिरोधानम्)

अगस्त्यः — कुम्भसम्भवत्वात् कुम्भयोनिरिति कथयिष्यन्ति मां । मैत्रावरुणिरपि अहमेव वशिष्ठोपि । अगस्त्याभिधाने मम विशेषत्वं एव । अस्तु । किमभिधानैः । अहं तु दुष्करं तपः करिष्यामि चिरब्रह्मचर्य्येण हिमगिरेरपरपार्श्वे तिद्बतदेशे आश्रमं निर्माय भगवतः परमात्मनः दर्शनाय ।

(प्रस्थानम्)

(२य दृश्यम्)

(तीर्थयात्रायां निर्गतो मुनिरगस्त्यः वनपथे व्रजति)

अगस्त्यः — अहो गर्त्तेऽस्मिन् पुरुषा अधोमुखा लम्बमानाः कम्पिताः दृश्यन्ते । (गत्वा पृच्छति) यूयं ब्रह्मवादिन इव दृश्यन्ते । तत्कथं अधोमुखाः लम्बध्वं गर्त्तेऽस्मिन् ?

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

पुरुषः — अगस्त्य ! वयं ते पितर एव । सन्तानार्थिनः गर्त्त-मनुप्राप्य दुःखं भुञ्जानाः । यदि त्वं उत्तममपत्यं जनयेथाः तर्हि अस्माकमस्मान्नरकात् मोक्षः स्यात् । तवापि उत्तमा गतिः भविष्यति अस्मत्सन्तोषात् ।

अगस्त्यः — पितरः ! मानसीं पीडां परिहरत । युस्मद्कामनां पूरयिष्यामि ।

पुरुषाः — स्वस्त्यस्तुते । सदृशीं कन्यामनुसन्धीय बशंरक्षां कुरु अस्मत् प्रीतये । (पितृणामन्तर्द्धानम्)

अगस्त्यः — सदृशी भार्य्यां कथं प्रापणीया । मत्तेजोधारणं कथं भवेद् बा इतरथा ? तत्तस्य प्राणिनः अनुत्तमाङ्गानि एकीकृत्य रमणी भवेत् चेत् मम सदृशी स्यात् रूपेण । अधुना बिदर्भराजः पुत्रार्थमदूरे तपोरतः । योगबलेन रमणीं सृष्ट्वा तस्मैबार्पयिष्यामि बररूपेण । समये ग्रहिष्यामि तां कार्य्याय ।

(बिदर्भराजनमुपगम्य)

राजन् ! संप्रति कन्यामेकां प्रयच्छामि । गृहं प्रयाहि । न तपसा भूयः । मत्कृपया उत्तमा कन्या भविष्यति ते ।

बिदर्भराजः— महर्षे ! अनुगृहीतोऽस्मि । ब्राह्मणानां तपस्विनां करुणां बिना कथं मङ्गलं स्यादर्थिनां । अशेषतस्ते प्रणामाः सन्तु मे । (प्रस्थानम्)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(इय दृश्यम्)

(पुष्करतीर्थे तीर्थयात्रायां गतानां अगस्त्यादि ऋषीणां राजर्षिणां च स्नानं)

वशिष्ठ :— महर्षयः । यात्रायां श्रान्ता वयं अत्र विश्रामं करिष्यामः ब्रह्मसरसि दिनानि स्थित्वा ।

अत्रिः — एवमस्तु । माघपूर्णिमायां कौशिकीनद्यां स्नानात् परं क्रमागतं भ्रमणमस्माकं । महाभागा अरुन्धतीयं क्लान्तापि दृश्यते । अत्र दिनानि स्थेयानि ।

नारदः — सरसि कमलानि दृश्यन्ते । तेषां संग्रहं कृत्वा तत्तण्डुलान् भक्षयिष्यामः । (तथा कुर्वन्ति)

अगस्त्यः — मुनयः । युस्माकं पुरत एव मया सरसः उद्धृतानि कमलानि अत्र ठूलीकृतानि । परन्तु इदानीमेकमपि न दृश्यते । केनादत्तं मे कमलं ? युस्मान् एव शङ्केऽहं । दीयतां मे पुष्कराणि । तत्रभवन्तः महान्तः हर्तुं नार्हन्ति पद्ममित्थं । कालो हि धर्मबीर्य्यं संहृत्य ग्लानिमापादयति । इदानीं अस्तेयरूपमहद्धर्मस्य हानिं पश्यामि । यावन्नराः गरीयसः नाबमंस्यन्ति तावत् तमोगुणस्य न प्राबल्यं । तत्पूर्वमेवाहं परलोकं यातुं इच्छामि । यतः एवं अधर्मे क्रमबर्द्धमाने तमसः बाहुल्यात् दुर्बलेषु बलीयसामत्याचारः भविष्यति । राजापि धर्मं व्यवहारदृष्ट्या द्रक्ष्यसीति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

ऋषयः — महर्षे ! न वयं चौराः कमलानामपहर्त्तारो वा। पुत्रपौत्राणां जीवितैः शपामः। पद्मचौरः ग्राममुख्यः भवतु, खरयानेन गच्छतु, बृत्यर्थे शुनः कर्षतु च। शुल्केन वा कन्यां ददातु सद्भिश्चैव विरोधं करोतु सः।

कश्यपः — सर्वत्र सर्वं पणतु। न्यासेऽपि लोभं करोतु कूट-साक्षित्वमेतु च।

गौतमः — कर्षकः मत्सरी भवतु सः।

पुरुः — चिकित्सायां प्रचरतु, भार्य्यया चैव पुष्यतु। श्वशुरात्तबृत्तिरपि भवेत् सः।

शुकदेवः — बृथामांसं समश्नातु, दिवापि मैथुनं गच्छतु राज्ञश्च प्रेष्यः भवतु सः।

नहुषः — स सन्यासी भूत्वा गृहसंस्थो भवतु। यज्ञदीक्षाया-मपि कामबृत्तोऽस्तु। वेतनं गृहीत्वा विद्यां प्रयच्छतु यस्ते हरति पुष्करम्। (सहसा इन्द्रस्याविर्भावः)

इन्द्रः — महर्षे अगस्त्य ! पुष्करचौरः चरितब्रह्मचर्य्याय अध्वर्जवे कन्यां ददातु, अथर्वणमधीत्य स्नातको भवतु, पुण्यशीलोऽस्तु ब्रह्मणोऽपि लोकं प्रयात्वन्ते।

अगस्त्यः — महेन्द्र ! भवतः शपथस्तु आशीर्वादरूपएव। अतस्त्वमेव कमलचौरोऽसि। दीयतां मह्यं पद्मानि।

इन्द्रः — (विहस्य) भगवन् ! लोभाय नापहृतं कमलं मया, मुनीनां मुखात् शपथाकारेण निःसारितं धर्मस्वरूपं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

श्रोतुकामः इत्थं कृतवान् । अतः क्रोद्धुं नार्हसि त्वं । अद्य आर्षधर्मः श्रुतोमया ऋषीणां मुखात् येन धर्मश्रुतेः समुत्कर्षः स्यात् । कमलं गृह्यतां मामपि क्षमस्व ।

अगस्त्यः — मघवन् ! प्रसन्नोऽस्मि ते सत्यभाषणेन । देहिमे-कमलानि । (गृह्णाति) भूयस्तीर्थानि गन्तव्यानि । यश्चेदमाखानं पर्वणि पठति स मूर्खपुत्रं न जनयति कदापि निराकृतिश्च न भवति ।

(प्रस्थानम्)

(४र्थं दृश्यम्)

(विदर्भराजकुमारी लोपामुद्रा विहरति सखीभिः सह)

राजा — (कन्यामवलोक्य) सुलक्षणा मे लोपामुद्रा इदानीं यौवनमापन्नापि न कोऽपि राजपुत्रः प्रार्थी भवति । यौवनस्थां शीलाचारसम्पन्नां उत्तमरूपमपिबिभ्रती-मिमां न कोऽपि प्रार्थयते कस्मात् । समयः प्रतीक्षणीयः । (दौवारिकस्य प्रवेशः)

दौवारिकः— महाराज ! महर्षिरगस्त्यः द्वारि तिष्ठति । भवद्दर्शन-मिच्छति च केनापि हेतुना ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

राजा — महर्षिरगस्त्यः। किमर्थमागतोऽत्र ? अतीव प्रचण्डता तस्य तपसः (प्रकाशं) सत्वरमानयात्र।

(ऋषेः प्रवेशः। राज्ञा पूजनम्)

अगस्त्यः — राजन्! पुत्रकारणात् विवाहे बुद्धिर्वर्त्तते मे इदानीं। तव कन्यां लोपामुद्रां वरामि भार्य्या-रूपेण। गार्हस्थ्यक्षमां तां कन्यकां सत्वरं प्रयच्छ मे यथाविधि।

राजा — महर्षे! क्षणमत्र तिष्ठतु भवान्। लोपामुद्रायाः सम्मतिः अवगन्तव्या। आगच्छामि। (गत्वा पत्नीं कथयति) प्रिये सर्वनाशः समुपस्थित इदानीं। अगस्त्यमुनिः कन्यायाः पाणिं प्रार्थयते। राजभवने दासीशतसेविता मे लोपामुद्रा। मुनिगृहेऽरण्ये कथं जीवितव्यं तया ? वृद्धो मुनिः अपरिस्कृतः श्मश्रुभस्मविदूषितः। कन्या मेऽतीव रूपवती युवती सुकुमारी च। किं करणीयम् ? अप्रदाने ऋषिशापात् महद्भयं चापि विद्यते।

(लोपामुद्रायाः प्रवेशः)

लोपामुद्रा — राजन्! मत्कृते पीडामभ्येतुं नार्हसि त्वं। ऋषये मां दत्वा आत्मनः रक्षा करणीया।

राजा — (श्रुत्वा दुःखेन निरुत्तरः। कन्याया अनुरोधेन सभार्य्यः प्रयच्छति कन्यां मुनये) मुने समर्पयामि कन्यकां मे तुभ्यं।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अगस्त्यः — लोपामुद्रे ! महार्हाणि वासांसि आभरणानि एतानि उत्सृज्य चीरं गृहाण बल्कलमजिनं वा ऋषिपत्न्याः अनुरूपाणि व्रतचर्य्यायै । वने स्थातव्यं नौ गङ्गाद्वारे जाह्नवीतटमाश्रित्य ऋषिभिः सह किमाभरणैः सौवर्णैः (पतिवचनात् लोपामुद्रा उत्सृजति स्वर्णालङ्काराणि बहुमूल्यानि वसनानि चीरं गृह्णाति च) ।

लोपामुद्रा— प्रस्तुतास्मि । (वनं गच्छतः अगस्त्यलोपामुद्रे विदर्भराजः सपत्नीकः नीरवमश्रुणि मोचयति-नेत्रयोः) ।

(पञ्चम दृश्यम्)

(गयान्तिके अगस्त्याश्रमः । गृहकर्मलग्ना तपस्विनी लोपामुद्रा)

अगस्त्यः — (तामालोक्य) तपः प्रभा स्फुरत्यस्याः शरीरे । वर्षाणि परिचरत्यपीयं राजपुत्री बहुमनेन कष्टान्य-गणय्य । परितृप्तोऽहमस्याः परिचर्य्यया, शौचेन, शीलेन, दमेन श्रिया रूपेण च । अधुना मत्कार्य्यः साधनीयः । इयमपि मत्तेजसां धारणे समर्था तपःशौचात्, तस्मात् समागमः प्रार्थनीयः । (समीपमाह्वयति) लोपामुद्रे !

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

लोपामुद्रा— (किमपि वितर्कयन्ती लज्जमाना तिष्ठति। क्षणान्ते कथयति) महर्षे! असंशयं प्रजाहेतोः भार्य्यया प्रयोजनं पत्युः। तथापि मम ग्रहमपाकर्त्तुं नार्हसि त्वं यतस्त्वयि मे महती प्रीतिः वर्त्तते। ब्रह्मन्! राजोचितशयने प्रासादकक्षे दिव्याभरणभूषिता सती स्रग्बिणं भूषणैर्बिभूषितं त्वा मुपसर्त्तुं मतिर्मे भवति। तस्मात् चीरकषायबासिनी त्वां नोपतिष्ठेयं। तपस्त्रीजनोचितं वेशमपि दूषयितुं नाप्युसहे इति।

अगस्त्यः — कल्याणि! तव पितुः यथाविधानि धनानि तथा द्रव्याणि न विद्यन्तेऽत्र तवापि ममापि च। तत् कथं पूरणीया त्वदिच्छा।

लोपामुद्रा— तपसा सर्वं समाहर्तुमीशोऽसि त्वं यत्किञ्चन वस्तु विद्यते जीवलोकेऽपि।

अगस्त्यः — एवमेतद्, यथात्थ त्वं। परन्तु एतेन तपसां व्ययः स्यादेव। यथा तपो न नश्येत् तथा प्रचोदय उपायेन।

लोपामुद्रा— ऋतुकालस्य अल्पोऽवशिष्टः सम्प्रति। तथापि त्वामुपैतुं नेच्छाम्यहमन्यथा। तवापि तपःक्षयं न कामयेऽहं। परतुं मदाग्रहः रक्षणीय एव।

अगस्त्यः — भद्रे! एवं ते दृढनिशयश्चेत् गच्छामि धनाहरणाय। त्वमिह स्थिता सती तपश्चर।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(निर्मोहोमुनिः गच्छति पत्नी मेकाकिनीं कुटीरे-
विहाय । पश्चादपि नावलोक्य सकृत्)

लोपामुद्रा— (पतिवर्त्म आलोकयति परितृप्त्या) अहो मुनेः
निर्मोहत्वं । अतीव प्रीताबपि मयि पश्चान्नावलोकते
सकृदपि ।

★★

(दृष्ठ दृश्यम्)

(त्रसदस्योः राजभवने अगस्त्यः, राजा श्रुतर्वा, ब्रध्नश्च)

अगस्त्यः — त्रसदस्यो ! वित्तार्थी एवाहमागतवान् । परन्तु यूयं
राजानः देशस्य आयव्ययं मां दर्शितवन्तः । युस्म-
दर्थग्रहणे अपराणां कष्टं स्यादेव । नाहं प्राणोपीडां
कर्त्तु मिच्छामि स्वार्थाय । अतः किं करणीयमधुना ?

त्रसदस्युः — (अन्यान्विलोक्य) ब्रह्मन् ! अस्त्युपायः
धनसंग्रहस्य ।

अगस्त्यः — अपराणां पीडामकृत्वापि ।

ब्रध्नः — बाढम् । न कस्यचिदपि पीडा स्यात् तद्धन-
ग्रहणेन । अपितु लोकातां मङ्गलं स्यात् यतः तद्धनं
अन्यायेन ठूलीकृतं एकस्य वित्तलोभिनः राक्षसस्य
बसतौ । परन्तु तत्र महती आपत्तिरस्त्येव ।

अगस्त्यः — कथमापत्तिरन्यायसंचितार्थग्रहणात् ? अन्येषां

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

संबिभागः एकेन बलादुपायात् वा गृहीतश्चेत् तदपि बलात् ग्रहणीय एव सामर्थ्ये सति ।

श्रुतर्वा — मुने ! अयं स बसुमान् दानब इल्वल एव । आतापिरिति च कथ्यते क्वचित् । नित्यं ब्राह्मणानां हत्यां करोति पूर्वं केनचित् ब्राह्मणेन पुत्रलाभे निषिद्धः सन् । कपटतया बिप्रबेशेन आनीय ब्राह्मणान् तेषामातिथ्यं करोति कपटछागस्य भ्रातुर्वातापेः मांसेन । पश्चात् भ्रातरं आह्वयति येन स तद् ब्राह्मणस्य उदरं बिदीर्य्य निर्गच्छति । ब्राह्मणश्च मृतो भवति । इयमेब रीतिस्तस्य धनार्थिनः ब्राह्मणान् एवं व्यापादयति धनलोभेन । ततः भीता बयं तत्र प्रेरयितुं भवन्तं बिपदमाशंक्य ।

अगस्त्यः — मा भयेन बिषादेन बा । महासुरं भक्षयिष्यामि । आगच्छन्तु मयासह मार्गं प्रदर्श्य ।

(७म दृश्यम्)

(इल्वलवेश्मनि अगस्त्यादीनां प्रबेशः)

इल्वलः — धन्योऽहं जातः भबद्दर्शनात् । आसनादिकं गृह्णन्तु भवन्तः । आतिथ्यमपि कर्त्तुमिच्छामि संस्कृतेन मांसेन ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अगस्त्यः — एवमस्तु । मा विलम्बेन । अहं तु मांसभोजनार्थी इदानीं भवामि नैते राजानः । तान् फलानि देहि ।

(प्रधानासने उपविश्य अगस्त्यः मांसं खादति । भोजनान्ते महान् अधोवायुः निर्गतस्तस्य)

इल्वलः — वातापे ! वातापे ! आगच्छ सत्वरं । अतिथीनां विदायकालोऽयं । ते तु सम्भाषणीयाः त्वया ।

अगस्त्यः — इल्वलः ! जीर्णोऽस्ति सोऽसुरः मया लोकहिताय अतः पुनर्निष्क्रामणे न शक्तोऽसौ । आतापे त्वां धनेश्वरं विदित्वा धनार्थ्यहमुपागतोऽत्र । एतेषां राज्ञामपि न तावत्धनमस्ति यद् ग्रहणादन्येषां पीडा न स्यात् । अतः अन्यान् अविहिंस्य यथाशक्ति धनानि देहि । राजानं एकैकशः गवां स्वर्णमुद्राणां च दशसहस्राणि दीयतां । मम च ततो द्विगुणस्यावश्यकता सौवर्णरथस्यापि च ।

इल्वलः — मुने ! यदुक्तं भवता तावत् परिमाणं धनं दास्यामि । परन्तु रथं यं अवोचः तस्य हिरण्मयत्वं न जानेऽहं ।

अगस्त्यः — न मे वाक् अनृता स्यात् तथा अनुक्तपूर्वत्वात् । जिज्ञास्यतां । रथस्य हिरण्मयत्वं व्यक्तं भविष्यतीति ।

इल्वलः — (स्व) धनं दत्वा राज्ञां प्रयाणानन्तरं स्वर्णरथेन वनपथि आश्रमाय गच्छन्तं मुनिं हनिष्यामि

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

एकाकिनं येन धनादायः भ्रातुर्वधस्य प्रतिशोधोऽपि सम्भविष्यति। (धनं ददाति नृपतिभ्यः अगस्त्याय च। तेषां प्रस्थानं। इल्वलस्य अनुधावनं च)

अगस्त्यः — मां विहन्तु मागच्छत्ययमसुरः। जगत्कण्टकः निवारणीयः। (समीपं गतेऽसुरे हुंकारादेव भस्मीकरोति।)

(दृश्यम्)

(आश्रमे लोपामुद्रा चिन्तिता)

लोपामुद्रा— दिनानि गतानि एकाकिन्या मया तिष्ठन्त्यात्र। ऋषेः प्रभावात् नचापत्तिः पतिता काचित्। परन्तु कथं विलम्बः? तपःशक्त्या मत्देहस्य स्रष्टापि प्राकृतस्येव रीत्या धनाहरणाय प्रयातः महर्षिः। इयमेव रीतिः महाजनानां। स्वार्थाय न किञ्चदपि कुर्वन्ति। तेषां सर्वकार्य्याणि तपःसिद्धयश्च जनमङ्गलाय एव। (अगस्त्यस्य प्रवेशः रथेन) एष आगच्छति महर्षिः सुवर्णमयरथेन। अखिलाभिलाषांश्च मे पूरयिष्यामि। (अगस्त्यपदेप्रणामः)

अगस्त्यः — कल्याणि लोपामुद्रे। अपि कुशलं वर्त्तसे। ममादर्शनात् क्षोभः संजातः किमु ते मनसि? कथं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

क्षोभः स्याद् वा श्रीबिद्याया उपासकायास्ते । अशेषतः स्वर्णमुद्राः सन्ति रथोपस्थे । यद् यद् मनसि वर्त्तन्ते ते बासनाः सर्वं पूरयाशु । नहि भोगैर्बिना त्यागः सम्भवति यथार्थतः ।

लोपामुद्रा— भगबन् ! सर्वं कृतबानसि त्वं मत्काङ्क्षितं । महात्मन् ! भवतः मयि प्रीतेः स्मृत्यर्थं अनेन धनेन अदूरे स्थापयिष्यामि पुरीमेकां मद्भृत्यानां सखीनां बासहेतोः या काले गयाक्षेत्रान्तिके महानगरीत्व-माप्नुय चिराय अगस्त्याश्रमस्य स्मरणं कारयिष्यति जनानां । इदानीं यथाकामं भवता बीर्य्यवत्तरम-पत्यमुप्तादयितव्यं मयि ।

(काले आभरणान्विता क्षौमपरिहिता लोपामुद्रा महार्हप्रकोष्ठेषु दिव्यभूषान्वितं पतिं समागच्छति यथाप्रस्तावितम्)

अगस्त्यः — लोपामुद्रे ! अपत्यबिषये बिचारणास्ति मे । बहु-पुत्राणां जनयित्री भबितुमिच्छसि अथबा एकस्य यः सहस्रजित् भबिष्यति ? एतन्निश्चित्य मनसा ब्रुहि मां ।

लोपामुद्रा— तपोधन ! एको विद्वान् साधुरसाधुसहस्रेभ्यः श्रेयान् । तस्मात् सहस्रसम्मितः एकोपुत्रो भवतु मे ।

अगस्त्यः — भामिनि ! अस्मिन् गर्भे महातेजस्वी पुत्रः भबिष्यति तेः परन्तु सप्तबर्षाणि यावत् गर्भबासानन्तरमेव ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

तावत्कालं कष्टेन दिनानि नेतव्यान्येव। दृढस्यु-
रिति तन्नामं रक्षयिष्यसि । समग्रवेदान्
साङ्गोपनिषदान् बाल्ये एवं आयत्तीकरिष्यत्ययं।
कार्य्याय बनं यामि। यथाकालमागमिष्यामि।
अधुना दासीभिः सेबिता सती अत्र दिनानि
सुखेन यापय। (प्रस्थानम्)

(इन्द्रध्वजम्)

(आश्रमे अगस्त्यः। दृढस्योः समित्भारेण सह प्रबेशः)

अगस्त्य — बत्स दृढस्यो! अनेन समिध्भारबहनेन ते अतीब-
प्रीतोऽहं। अद्य प्रभृति इध्मबाह इति ते नामान्तरं
प्रसिद्धिं यातु जगत्यां, लोपामुद्रे! पुत्रस्ते वेदानां
पारगामी संजातः। (इत्यन्तरे जनानां देबानां च
प्रबेशः सुमनसः! स्वागतं वः। किमर्थमागता
अत्र। का सेबा करणीया मया।

लोकाः — प्रकृतेः बिपर्य्ययात् बिन्ध्यपर्वतः अनुदिनं बृद्धि-
याति। प्राचीरमिबास्थितं मध्यदेशं जम्बुद्वीपस्य
प्रबृद्धमिमं पर्वतमतिक्रम्य दक्षिणदेशगमने महत्-
कष्टमनुभवामः बयं। तस्मात् उपायः क्रियतां येन

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

पुनः वृद्धिं न गच्छेत् गिरिरयम्। अन्यथा गिरेरुभयपार्श्वे जनाः स्तोकं सूर्यरश्मीः प्राप्नुवन्ति यच्च कष्टाय।

अगस्त्यः — (किञ्चित् विचिन्त्य) पर्वतात्मानं मन्त्रेण स्तम्भयिष्यामि लोकानां मङ्गलाय। पर्वतस्तु भूमेरुद्भेदः। अन्तराले शिथिलीकृते न भूयो वृद्धिः स्यात्। वर्द्धितांशं मन्त्रबलेन विदीर्य्य मार्गं कारयिष्यामि येनाहं ऽपि तेनैव पथा गमिष्यामि दक्षिणाहि। दाक्षिणात्येऽपि स्थातुमिच्छामि लोकेषु वेदार्थ प्रचाराय।

देवाः — महात्मन्! कालेय नाम दैत्याः दिवसे समुद्रान्तः तिष्ठन्तः रात्रौ आश्रमपदेसु मुनीन् भक्षयन्ति। वशिष्ठाश्रमे मुनीनां अष्टाशित्यधिकं शतं मारितं तैः। एवं च्यवनाश्रमे भरद्वाजाश्रमेऽपि शतशः ब्रह्मचारिणः, द्विजाश्च फलमूलाशनाः नियताहारकर्षिताः बहुशः निपातिताः। क्षीणेषु ब्राह्मणेषु स्वाध्यायवषट्काराणां यज्ञाहुतीतां अभावः संघटितः येन अस्माकं दुर्दशा। क्षीयमाणा जनाः प्राणभयेन दिशो द्रवन्तः गुहामाविशन्ति नदीतीरेवा गोपनं तिष्ठन्ति।

अगस्त्यः — न कोऽपि महेश्वासः क्षत्रियो वर्त्तते किमु दैत्यानां नीरसनाय।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

देवाः — सन्ति केचित्। तेऽपि यत्नं कृत्वा निष्फला जाताः दैत्याः समुद्रे आत्मगोपनं कुर्वन्ति।

अगस्त्यः — तर्हि राक्षसानां निवासस्थान कथय। पूर्वसमुद्रः पश्चिमसमुद्रो वा। लोपामुद्रया सह आदौ विन्ध्य-पर्वतं अवनमय्य गोदावरीतटे आश्रमं निर्माय स्थास्यामि। अनन्तरं तत्र तवाभिगमने सति युस्माभिः सह समुद्रतटं गत्वा तदायतनं जलमेव शोषयिष्यामि उपायेन यत्र ते तिष्ठन्ति कालकेयाः। इदानीं गच्छत। अहं यास्यामि विन्ध्यगिरेः वृद्धिनिरोधाय लोपामुद्रया सह दृढस्युमत्राश्रमपदे स्थापयित्वा। (प्रस्थानम्)

★★

(१०म दृश्यम्)

(समुद्रतटे देवैः सह अगस्त्यः)

अगस्त्यः — देवाः महर्षयः। लोकहिताय वरुणालयं स्तोकं शोषयामि येन भूमिभागो वर्द्धिष्यते लवणस्य च संग्रहः स्यात्। जलबिन्दोः परतणुना (Proton) परमात्मतेजसा समुद्रमाहत्य जलानि स्वप्रकृतौ अग्नौ रूपान्तरीकरिष्यामि। (तथा करोति। समुद्रं शुष्कं दृष्ट्वा चराचरं विस्मितं। गन्धर्वैः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

बीणाबादनं पुष्पबृष्टिश्च मुनिशिरसि)

देबाः — (महर्षि प्रणम्य) "त्वं नस्त्राताबिधाता च लोकानां लोकभाबन । त्वत्प्रसादात् समुच्छेदं न गच्छेत् सामरं जगत्" ।

अगस्त्यः — देबा यत् कार्य्यं भवद्भिः तत् शीघ्रं बिधीयतां ।

देबाः — महर्षे ! दृष्टाः सन्ति दैत्याः क्षणेन वधिष्यामः महास्त्रैरेतान् । (देबदानबानां संग्रामः । दानबाः मृताः शेषाः पातालं प्रयाताः)

अगस्त्यः — आप्तकामाः जाताः किमु देबाः ?

देबाः — भबत्प्रसादात् जगद्ध्वंसकाः नाशं गताः । ब्राह्मणाः बेदाश्च पुनः प्रतिष्ठिताः । महाबाहो त्वयि लोकसर्जने शक्तिर्वर्त्तते एव । अतः पुनः शोषितानि जलानि पूरय अस्मिन् सागरे ।

अगस्त्यः — देबाः ! जलानि जीर्णानि अर्थात् प्रकृतिं गतानि । जलपूरणे उपायान्तरं चिन्तनीयं ।

देबाः — बिस्मिता - मुनिं प्रणमन्ति ।

आतापिर्भक्षितो येन बातापि च महासुरः
समुद्रः शोषितो येन स नोऽगस्त्यः प्रसीदतु ।

मुने ! लबणस्याबिस्कर्त्तासि त्वं । लोकास्तद् व्यवहृत्य तुष्टाः भबिष्यन्ति । (प्रस्थानं)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(११श दृश्यम्)

(इन्द्रसभायां प्राप्तेन्द्रपदस्य नहुषस्य पुरतः अगस्त्यादिमुनयः)

नहुषः — मुनयः ! मत्शिबिकावाहकाः भूत्वा मां शचीदेव्याः पुरं नयत। देवानां राजपदेऽभिषिक्तस्य मे वचनं पालयितुं यूयमर्हथ कर्त्तव्यत्वात् । दयालवः ! शचीं प्राप्तुमुत्कण्ठितोऽहं । त्वरयन्तु तस्मात् ।

मुनयः — (विस्मिताः) शचीदेव्याः रक्षणाय देवगुरोः मन्त्रणेयं । इन्द्रपदात् आसन्नभ्रंशोऽप्ययं अमलान् ब्रह्मर्षीन् यत् श्रमार्त्तान् कर्त्तुमिच्छति। (प्रकाशं) एवमस्तु । (शिबिकावाहनात् श्रान्ताः मुनयः शिबिकां स्थापयित्वा) देवराज ! संशयं नः छेत्तुमर्हसि मनसि समुप्तन्नं । गवां प्रोक्षणे ये वेदोक्तयन्त्राः वर्त्तन्ते ते प्रमाणभूता न वा ?

नहुषः — अप्रमाणास्ते ।

मुनयः — अधर्मे प्रवृत्तत्वात् महर्षिसम्मतान् मन्त्रान् अवज्ञायसे ।

नहुषः — न कालक्षेपो विचारणाभिः । शिबिकां वाहयत सत्वरं । शचीं दिदृक्षुरहमिदानीं ।

(ऋषीणां पुनर्वहनमगस्त्यं पुरस्कृत्य । ह्रस्वशरीरत्वात् कष्टात् मन्थरं गच्छति अगस्त्यः)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

नहुषः — अगस्त्य सप सर्प त्वरया। (क्रोधात् शिविका-पातनमगस्त्येन येन क्रुद्धः नहुषस्तं पदा प्रहरति)

अगस्त्यः — राजन् इन्द्रपदं त्वयि कथमपि न युज्यते। स्वयम-योग्योऽपि देवैः पुष्टतेजसः सन् पदं आसीनोऽसि। परन्तु बुद्धिस्ते एतावतापि तमसा आच्छन्ना दृश्यते। अन्यथा ब्रह्मकल्पान् भावितात्मानः दुर्द्धर्षान् मुनिपुङ्गवान् भारं बाहयसि। ऋषिभिः अनुष्ठितं प्रमाणभूतं वेदमन्त्रं अप्रमाणं उक्त्वा ब्रह्मर्षिभिः सह विवादं करोषि पदा शिरसि प्रहृत्य सर्पसर्प इत्युक्त्वा प्रभुत्वं प्रकटयसि। अतः हतप्रभः निःश्रीकः स्वर्गभ्रष्टः महीतले चिराय सर्पीभूत्वा स्थास्यसि।

नहुषः — (प्रकृतिंगतः) मुने प्रमादात् कृतवानित्थं। अनिच्छन्तं मां देवा आनीय इन्द्रपदे स्थापितवन्तः मह्यं तेजसा संवर्द्ध्य। तस्मात् अयोग्यस्य मे स्खलनं स्यादेव। प्रणतोऽस्मि। प्रपन्नोऽस्मि त्वां। मयि कृपां विधाय मदुद्धारं कुरु इति।

अगस्त्यः — नहि मे वाक् अन्यथा स्यात्। सर्पदेहेन स्थातव्यं त्वया मर्त्ये चिराय। द्वापरान्ते युधिष्ठिरस्य धर्मां-शजातस्य पदास्पृष्टः तत्प्रश्नोत्तरं निशम्य पुतात्मा सन् पुनरेष्यति स्वर्गमिति।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(१२श्च दृश्यम्)

(अगस्त्याश्रमे देवानां प्रवेशः)

देवा — विपुलव्रतो मुनिरयं आदित्य इव तेजसा युक्तो दृश्यते तपः प्रभावात् । अतीव कोपनशीलोऽप्यसौ । साबधानतया बिनयेन विज्ञाप्य दुःखं नः । शरणागतानां दुःखं हरत्यसौ दयालुत्वात् । पूर्वं दृष्टान्ता श्चापि वर्त्तन्तेऽस्य दयालुतायाः शक्तिमत्तायाश्च विन्ध्यनियमनात् समुद्रशोषणात् ।

(प्रणमन्ति)

अगस्त्यः — देवाः स्वागतं वः । आसनानि सपर्पयामि । शक्तिमतां लोकपालानां किमहं कार्य्यं साधयिष्यामि भूयो वा वज्रधरे स्वयं वर्त्तमाने ।

देवाः — महामुने ! दानवनिर्जिताः वयमिदानीं निरुत्साहाः भग्नाः ऐश्वर्य्याच्च भ्रष्टाः जाताः । न केवलं तत् पितृणां स्वधा देवानां यज्ञाश्च तैः वलात् अपहृताः । अधुना भयात् विचरामः पृथीव्यां स्वर्गं हित्वा । पाहि नोऽस्मात् तीव्रभयात् ।

अगस्त्यः — (कुपितः) स्वर्गस्थान् दैत्यान् सद्योभ्रष्टान् करिष्यामि अग्निदाहेन लोकानां कर्मेज्याः नष्टाः यतः तैः ।

(अगस्त्यशरीरात् अग्निशिखाः निर्गच्छन्ति)

देवाः — अहो कालाग्निरिव तेजांसि अगस्तेः शरीरात् निर्गम्य

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दैत्यान् दहन्ति। अगस्त्य तेजसा दह्यमानास्ते दिवं भुवं च त्यज्य दक्षिणांदिशं पलायन्ते ।

अगस्त्यः — सुराः शान्तभयाः यूयं स्वर्लोकं गच्छेत इदानीं ।

देवाः — महर्षे । इदानीमपि बलेः यज्ञायतने केचित् दैत्याः पातालेऽपि केचन वर्त्तन्ते जीविताः। तानपि जहि कृपया ।

अगस्त्यः — महीगतान् असुरान् दग्धुं न शक्तोऽस्मि तपो हि क्षीयेत मे तथाकृते। तेऽपि ईश्वरसृष्टाः जन्तवः जीवितुमर्हन्ति । निरपराधानां नाशः कथं करणीयो वा ।

(देवानां प्रस्थानं)

(१३ च दृश्यम्)

(दाक्षिणात्ये अगस्त्याश्रमः)

अगस्त्यः — लोपामुद्रे अत्र दक्षिणाहि मनोरमे गोदावरीरोधसि आश्रमोऽयं मह्यमतीव रोचते । अत्रैव स्थातव्यं दीर्घकालं भगवतः दाशरथेः रामचन्द्रस्य सभ्रातृ-कलत्रस्य आगमनं यावत् ।

लोपामुद्रा— मुने। परन्तु भगवान् नारायणः दाशरथीरूपेण आत्मानं चतुर्द्धाकृत्वा जनिष्यमाणः इति श्रुतं मे नारदस्य मुखात् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अगस्त्यः — एवं, एवं, भगवतः पूर्णांशेन अवतारः स्यात् रामरूपेण, शेषदेवस्य लक्ष्मणरूपेण, लक्ष्म्याश्च सीतारूपेण। एवं भरतशत्रुघ्नावपि देवस्य आयुधवरावेव। साक्षात् विष्णुं द्रक्ष्यावः अत्रावस्थानात्। सम्मतं त्वया किमु। वेदार्थमपि प्रचारयिष्यामि अत्र दक्षिणदेशे इति मे मतिः। उत्तराहि पर्य्याप्तं भ्रमितं। बहुस्थलेषु आश्रमाः स्थापिताश्च वेदशिक्षां प्रवर्त्तयन्। जमदग्निर्विश्वामित्रादयः मत्शिष्याः प्रतिष्ठिताः जगत्याम्। इदानीमत्रैव स्थातुमिच्छामि अन्ते।

लोपामुद्रा— अस्त्ववं यदीच्छसि भवान्। भ्रमणक्लान्तापि संजाताहं। चिराय स्थातुमिच्छामि अहमपि परिणते वयसि। किं नौ कार्य्यं बावशिष्यते। इध्मवाहः इदानीं आचार्य्यः सन् स्वाश्रमे शिष्यैर्वसति। विष्णुदर्शनात् जन्मसार्थकं कर्त्तुमिच्छाम अहमपि अत्रावस्थानात्।

अगस्त्यः — परन्त्वत्र आदौ यज्ञदीक्षां नेतुमिच्छामि। जगद्धिताय महायज्ञं करिष्यामि द्वादशवर्षाणि व्याप्य। आगमिष्यन्ति अग्निकल्पाः महात्मानः, अश्मकुट्टाः मरीचिपाः, वैधसिकाः, परिपृष्टिकाः प्रसंख्यानाः भिक्षवः, यतयश्च फलमूलाशनाः।

लोपामुद्रा— कथमेतेषां भेदाः?

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अगस्त्यः — शृणुतर्हि । अश्मकुटाः— अश्मोपरि धान्यकुट्टनात् मरीचिपाः— सूर्य्यरश्मीः पिवन्ति केवलं । परितृष्टिकाः— पृष्टाश्चेत् दत्तान्नस्यग्रहणं येषां । बैधसिका— यज्ञशिष्टान्नभोक्तारः । प्रसंख्यानाः— तत्वबिचारशीला इत्यादयः ।

—●—

(१४श दृश्यम्)

(अगस्त्यस्य द्वादशवार्षिकी यज्ञदीक्षा)

अत्रिः — मुनयः ! महर्षिणा यजमानेन यथाशक्ति शुद्धान्नं समुपार्जितं दत्तं च तेन बिमत्सरेण श्रद्धया । सत्रमिदं द्वादशबार्षिकं भविष्यत्येव । परन्तु इन्द्रदेदेन वर्षा न कृता एतावता । पुरानेन मेरौ-भगवत्याःदर्शनमप्राप्य क्षुभितेनमनसानन्तरं शाक्तदीक्षां गृह्णता देवीमाहात्म्यचर्चाभिः श्रीविद्यो-पासनया महासिद्धिः प्राप्ता देव्याः दर्शनंच । अस्य पत्नी लोपामुद्रापि एवं सुसिद्धा । गुरुमण्डले उभयोः उत्तमस्थानं वर्त्तते एव । तथापि शक्ति मतोऽप्यस्य सत्रे कथं अन्नाभावः भवेद् वा । अवृष्टौ संचितान्नस्य क्षयात् आगतेषु वर्षेषु कथं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

यज्ञमिदं करिष्यामः । अतः अगस्त्ये भवन्तः अनुग्रहं कर्तुमर्हन्त्येव । (अगस्त्यस्य प्रवेशः)

अगस्त्यः — महर्षयः ! प्रणामाः सन्तु भवद्भ्यः । वासवः द्वादशवर्षाणि यावत् न वर्षिस्यति चेत् अहं सनातनरीति मनुसृत्य चिन्तायज्ञं करिष्यामि । अथवा संचितान्नस्य क्षयमकृत्वा स्पर्शमात्रैणैव देवान् तृप्तान् विचिन्त्य स्पर्शयज्ञं निर्वाहयिष्यामि । धानेन ध्येयो भूत्वा यज्ञमपि करिष्यामि । बीजैरपि प्राक्संचितैः यज्ञं करिष्ये निर्विघ्नं । अत्र वर्षाया-मवर्षायां वा मम सत्रं वृथा न भविष्यति । यदि अभ्यर्थनयापि इन्द्रो वृष्टिं न करिष्यति ततः स्वयं इन्द्रो भूत्वा प्रजाः जीवयिष्यामि । मयि इन्द्रे भवति ये यथाहारजाताः ते तथैव भविष्यन्ति विशेषेण ।

ऋषयः — साधु साधु ।

अगस्त्यः — त्रैलोक्ये यानि वसुनि खण्णानि च तानि इहा-गतानि सन्तु । दिव्याप्सरसः गन्धर्वादयः मखं मे उपासन्त्वत्र । उत्तर कुरुभ्यश्च यत्किञ्चद् वसु विद्यते तदपि इहोपतिष्ठतु । तथा स्वर्गसदश्च धर्मश्च सर्वे इहागच्छन्तु । (सर्वेषामागमनं)

ऋषयः — अहो प्रभावाः ऋषेः । महर्षे तव वाक्येन वयं प्रीताः सन्तः स्वस्वस्थानं गन्तुमिच्छामः ।

Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

न्यायार्जितबित्तेनैव ते यज्ञं संपादयिष्यामः । स्वकर्माभिरतानां अस्माकं न्यायेन उपार्जित आहार एव । अतः अहिंसक महर्षे यज्ञे अहिंसां प्रतिपादय येन वयं तुष्टा भविष्यामः । (इत्युक्तवस्त्चु मुनिसु इन्द्रेण बर्षारम्भः स्वयमागत्य बृहस्पतिना)

इन्द्रः — महर्षे । न मे दोषो धर्त्तव्यः । बिनयेन प्रसादयामि भवन्तं ।

अगस्त्यः — देवेन्द्र । आसमाप्तेः यज्ञस्य इह स्थातव्यं त्वया गुरुणा सह प्रसन्नश्चेत् ।

(१५श दृश्यम्)

(अगस्त्याश्रमे सीतारामलक्ष्मणानां प्रवेशः)

रामः — लक्ष्मण । एष एव आश्रमः महामुनेरगस्त्यस्य येन लोकानां हिताय राक्षसानां निरसनात् दक्षिणा-दिक् शरण्या कृता । तस्मात् अगस्त्यदिगिति कथयन्ति दक्षिणां दिशं । यथाश्रुतं अत्राश्रमपदे बृक्षाः स्निग्धपत्राः, मृगपक्षिणः क्षमाशीलाः, बनानि प्राज्यधूमाकुलानि चीरमालाशोभितानि परिश्रान्त श्रमापहानि च । महात्मानं अगस्त्यं चिरायुषं आराधयन् अत्राश्रमे एव बनवासस्य अवशिष्ट

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

-दिनानि नेतुमिच्छामि । अत्र सिद्धाः महात्मानः अपि देहं त्यक्त्वा स्वर्गाय यान्ति दिव्यबिमानानि आरुह्य । त्वामादौ गत्वा अस्मदागमनसम्वादं प्रदापयन् दर्शनाय अनुमतिं गृहाण ।

(लक्ष्मणो याति आश्रमं)

लक्ष्मणः —(मुनिकुमारं दृष्ट्वा) कुमार । अयोध्याराजस्य दशरथस्य पुत्रः रामचन्द्रः सभार्य्यः मुनेः दर्शनार्थी सन् अनुमतिं प्रार्थयते । तस्यानुजो लक्ष्मणोऽहं । महामुनिं अगस्त्यं विज्ञापय कृपया ।

(आज्ञामानीय तान् नयति समीपं कुमारः)

रामः — सौमित्रे । भगवान् अगस्त्यः अग्निशालायाः बहिः आगच्छति । विशिष्ट तेजसा अयं तपसां निधिरगस्त्यरिति मे मतिः । (पादग्रहणं । आलिङ्गनान्ते ऋषिणा स्वयमुपविश्य अग्नौ आहुतिदानम्)

अगस्त्यः — श्रीराम । बानप्रस्थीना मग्निपूजानन्तरमेवातिथिपूजनम् । त्वं राजासि अतः माननीयोऽसि नः । पूजां स्वीकुरु । मानद । वैष्णवं धनुरिदं हेमवज्रबिभूषितं, सूर्य्यसन्निभः शरः, राजतखड्गः, अक्षयतूणीरौ च सन्ति ब्रह्माज्ञया मदन्तिके कालात् त्वदर्थं । एतान् आशु गृहाण । समये असुरान् नाशय । (गृह्णाति बिनयेन)

रामः — कृतकृत्योऽहं करुणया ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अगस्त्यः — राम ! लक्ष्मण ! प्रीतोऽस्मि युवाभ्याम् यन्मां अभिवादयितुं एतावताध्वश्रमं कृतवन्तौ । एषा सुकुमारी सीतापि व्यक्त्यमुत्कण्ठते श्रमेण । राम ! यथा सीता इह रमते तथा चरणीयं त्वया । भर्तृ-स्नेहात् वनमागत्य दुष्करं कर्म खलु कृतमनया । प्रायेण स्त्रियः विषमे पतितं पतिं त्यजन्ति यतस्तासु विद्युतः चञ्चलता, शस्त्राणां तीक्ष्णता, अनिलस्य गतिरपि प्रकृत्यैव विद्यमानाः । परन्तु अरुन्धतीव इयं सीता दोषहीना एव ।

रामः — महर्षे अनुगृहीताः वयं एवं प्रसादेन भवतः प्रिय-वाक्येन च । उत्तम स्थानं वासयोग्यं कृपया कथय मां ।

अगस्त्यः — राम ! सर्वं ते गतचरितं पितुः दशरथस्य च विदितोऽस्ति तपसा । मयासह वासं प्रतिज्ञाय अत्राश्रमे पुनरन्यत्रवासं यदिच्छसि तन्मुनीनां रक्षणाय राक्षसानां वधार्थमेवेति जानामि यतस्ते राक्षसाः मद्भयात् नात्र तथागच्छन्ति । भद्र ! पञ्चवटीं याहि गोदावरीतटे बहुकाननां यत्र मैथिली रंस्यते एव । अनेनैव पथा गच्छन् मधुकानां महावने पर्वतस्याविदूरतः पञ्चवटीं प्राप्स्यते एव भवान् । भद्रं ते भूयात् । (प्रणामः प्रस्थानंच) ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

ॐ स्वस्तिनोऽइन्द्रो वृद्धश्रवाः स्वस्तिनो पूषा विश्ववेदाः। स्वस्तिनो तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।

(१६श दृश्यम्)

(राबणयुद्धे रामः परिश्रान्तः तिष्ठति। पुरतः राबण उपस्थितः राम समीपे अगस्त्यस्य प्रवेश। रामस्य प्रणामः)

अगस्त्यः — महाबाहो रामचन्द्र! क्षोभेन मा, युद्धे जयाय सनातनं आदित्यहृदयं नाम गुह्यं स्तोत्रं कथयामि ते। तदर्थमेहाहं देवैः प्रेरितः। तस्य जपात् बिजयी भवस्येब अचिरात्। तस्मात् त्रिराचमनं कृत्वा मत्तः स्तोत्रं गृहीत्वा मङ्गलमयं भुबनेश्वरं भास्करं पूजय।

(रामस्य ग्रहणं पठनं च आचमनान्ते)

रामः — ॐ अस्य श्री आदित्यहृदयस्तोत्रस्य। अगस्त्यऋषिः अनुष्टुप्छन्दः। आदित्यहृदयभूतो भगबान् ब्रह्मा देवता। ब्रह्मबिद्या सिद्धौ सर्बत्र जयसिद्धौ बिनियोगः।

ॐ आदित्यः सबिता सूर्य्यः खगः पूषा गभस्तिमान्
हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

जयाय जयभद्राय हर्य्यश्वाय नमोनमः
तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ॥

तप्तचामीकराभाय हरये बिश्वकर्मणे
नमस्तमोभिनिघ्नाय रुचये सर्बसाक्षिणे ॥

नाशयत्येष वै भूतं तमेव सृजति प्रभुः
पायत्येषः तपत्येष वर्षत्येषः गभस्तिभिः ॥

(सूर्य्यस्याबिर्भावः)

सूर्य्यः — रघुनन्दन ! त्वरय । संक्षयकालो राक्षसस्य न दूरे वर्त्तते । (अन्तर्द्धानं)

अगस्त्यः — रामः ! पुनः साक्षात् करिष्यामि अभिषेकसमये । (अन्तर्द्धानं)

(१७श दृश्यम्)

(अगस्त्यस्य जलशय्या द्वादशबर्षाणि व्याप्य । दीक्षासमाप्तौ देबानां श्रीरामस्य च आगमनं)

अगस्त्यः — स्वागतं देबेभ्यः । सुराः ममार्च्चनं गृह्णध्वम् । (पूजान्ते प्रस्थानं तेषां प्रणामात्)

रामः ॥ — मुनये नमोऽस्तु । (अवनतशिरसा चरणं प्रगृह्य नमति)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अगस्त्यः — स्वागतं ते महाराज ! दिष्ट्या प्राप्तोऽसि । तवात्रागमनं शूद्रबधं, ब्राह्मणपुत्रजीवापनादिकं सर्वं ज्ञापितं सुरैः । अत्र रजनीं स्थित्वा प्रातः स्वपुरीं यातुमर्हसि । राम ! विश्वकर्मानिर्मित मिदमाभरणं तुभ्यं दातुमिच्छामि । त्वं राजासि दिक्पालतेजसान्वितश्च । इन्द्रतेजसा गृहाणेदं । न दोषः स्यात् ।

(ग्रहणानन्तरम)

रामः — महर्षे ! कौतूहलं भवति मे आभरणप्राप्तिहेतुं विज्ञातुं ते । कृपया ब्रूहि मां ।

अगस्त्यः — श्रीराम ! एकदाहं मृगपक्षिवर्जितं दण्डकवनं प्रविश्य कस्यचित् जनशून्याश्रमस्य समीपे सरस्तीरे शवमेकं दृष्टवान् यदमलिनं सुपुष्टं चासीत् । शवस्य अपूर्वत्वं दृष्ट्वा तत्रापेक्षमाणोऽहं आसम् मुहूर्त्तं । इत्यन्तरे दिव्यविमाने दिव्यपुरुष आगत्य शवं भक्षयित्वा प्रत्यागन्तुं आरब्धवान् । तदाहं तत्परिचयं शवभोजनहेतुं च पृष्टवान् । तेनोक्तं विदर्भराजस्य सुदेवस्य पुत्रः श्वेतोऽहं पूर्वजन्मनि । राज्यशासनान्ते अन्तिमकालं विज्ञाय भ्रातरं सुरथं राज्यं प्रदाय अत्र तीव्रतपसा ब्रह्मलोकं गत्वापि तत्र क्षुत्पिपासाभिः पीडतः ब्रह्माणं आहार्य्यं याचितवान् । ब्रह्माह— तपसा एव स्वशरीरपोषणं कृत्वा अत्रागतोऽसि अन्नदानादिकमकृत्वा यतः क्षुत्पिपासावर्जितेऽपि ब्रह्मलोकेऽस्मिन् त्वां क्षुधा

CC-0. Vasishtha Tripathi Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

बाधते। तब शव एव त्वया भक्ष्यः भवतु अगस्त्य-ऋषिदर्शनं यावत्। तं दानादिकं दत्वा शव-भक्षणात् मुक्तो भविष्यति इति। अतः मुने! इदं दिव्यमाभरणादिकं गृहीत्वा मां मोचय महासंकटात्। तस्य करुणवचसा द्रवीभूते मयि तद्भूषणानि गृहीतवति सति श्वेतस्य शवदेहो ननाश। श्रीराम! इदं तदेवाभूषणं।

रामः — महर्षे! अनेकाश्चर्य्याणां प्रभवः तपसां निधिरेव-भवान्। आत्मनः पावनार्थं भूयो भूयो आगमना-भिलाष्यहं सर्वदा।

अगस्त्यः — तव शुभवाक्यैरतीव प्रीतोऽहं। सकृत् दृष्ट्वा सकृत् वचनमाकर्ण्य नाम ते सकृत् संकीर्त्य जनः मुक्तो उत्तिष्ठते। राम! अकुतोभयं राज्यं प्रशाधि यतः धर्मेण जगतः परमाश्रयोऽसि।

रामः — कृतकृत्योऽहं। अनुगृहीतोऽस्मि।

(प्रस्थानंप्रणामात्)

अगस्त्यः — नहि मे भूयोदर्शनं। मत्शिक्षाः शाक्तसूत्रे अगस्त्यसंहितायां च रक्षिता एव। श्रीविद्याभाष्येऽपि हयग्रीवात्प्राप्ता पञ्चदशीविद्याया व्याख्या कृतामया। ब्रह्मसूत्रेऽपि भाष्यं कृतं मया यत् काले लुप्तमपि श्रीकरभाष्ये आत्मानं दर्शयिष्यति। रुद्रप्रयागे, गङ्गाद्वारे, गयान्तिके, रोहिणीपर्वते (ट्राभांकोर निकटस्थे) श्रावनकोरीमायां आश्रमाः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

स्थापिताश्च । कालात् जीवामि । लोपामुद्रा कालात् दिवं गता । जलशय्यादीक्षा महाप्रयाणस्य सोपानमिव मे । लोकलोचनस्य अन्तराले एव त्यक्ष्यामि देहं परं ध्यायन् योगेन ।

—●—

(१८शं दृश्यम्)

(काले शिष्याः कथयन्ति रुदन्तः)

शिष्याः — सतीर्थाः ! पश्यत । सरसां मलीमसं दूरीकृत्य अयमस्मद् गुरुः उज्ज्वलज्योतिष्करूपेण दक्षिणाकाशे भाद्रपदस्य सप्तदशदिवसादारभ्य उदितो दृश्यते । दिवसत्रयान्ते मासान्तः स्यात् । अतः अस्यामेव सन्ध्यायां नक्षत्रास्तगमनस्य प्राक् लोकैः सह वयमपि गुरुगुरुपत्नीभ्यां अगस्त्यलोपामुद्राभ्यां शंखे श्वेतपुष्पजलतण्डुलादिकैः अर्घ्यं दास्यामः-

अर्घ्यदानम् ! —

ॐ काशपुष्पप्रतीकाश अग्निमारुतसम्भव
मित्रावरुणयोः पुत्रः कुम्भयोने नमोऽस्तुते ।

जगद् गुरवे अगस्त्यऋषये एषोऽर्घ्यः स्वाहा । (पुनः)

"लोपामुद्रे महाभागे राजपुत्रि पतिव्रते
गृहाणार्घ्यं मयादत्तं मित्रावरुणिवल्लभे ।"

लोपामुद्रायै एषोऽर्घ्यः स्वाहा ।

(प्रणामः । यवनिकापतनम्)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

जयगुरु

अवधूतो दत्तात्रेयः

मङ्गलम् ....

अनाद्यविद्याप्रशमेसुदक्षं भवाग्नितप्तस्यसुधाप्रलेपम्
भक्ताभिलाषाननुपूरयन्तं नमामि दत्तस्यपदारबिन्दम्। (१)
यज्ञोपवीतैःपरिशोभितासं जटाकलापैः रमणीयशीर्षम्
शुनानुयातं धृतपानपात्रं दत्तं नुमः ब्रह्मणि संचरन्तम्। (२)

(१म दृश्यम्)

(आश्रमे अनसूया पुत्रान् स्तन्यं पाययति। द्वारि तिष्ठन्ति पार्वतीलक्ष्मीसरस्वत्यः)

अनसूया — देव्यः! स्वागतं वः किमत्र कार्य्यं महादेवीनां दीन ब्राह्मणाश्रमे।

देव्यः — अनसूये! पुत्रीभूतान् एतान् अस्मत्स्वामिनः प्रतिग्रहीतुं आगता वयम्। पराजिता एव वयं। यथार्थतः त्वं सतीनां ललामभूतासि। अपराधान् क्षमस्व नः।

अनसूया — एवं चेत् बालत्वं मुञ्चन्तु मद्वाक्यात् एते देवाः युस्मद्भर्त्तारः।

(ब्रह्मादयः स्वरूपमागत्य)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

देवाः — अम्ब ! वरं गृहाण अस्मत्तः पालनफलत्वेन ।

अनसूयाः — पुत्रीभवेत मे यूयं । युस्मासु स्नेहो वर्द्धितो मे एतावता लालनात् ।

देवाः — अस्त्वेवं । अस्मदंशेन पुत्रत्रयं भविष्यति ते । लोकानां महोपकारसाधनात् ते स्वकुलं आलोकयिष्यन्त्येव ।

अनसूया — प्रसन्नास्मि । (सर्वेषां प्रस्थानं)

(२य दृश्यम्)

(आश्रमे अत्रिरनसूया जल्पतः)

अनसूया — स्वामिन् ! देवत्रयस्य प्रसादात् सम्भूतपुत्रत्रये दत्त एव विष्णोरंशेन जात इति मे मतिः शान्तस्वभावात् क्षमाशीलत्वात् च । चन्द्रमा ब्रह्मणः अंशत्वात् द्विजानां राजत्वमवाप्तवान् । अस्मत् दुर्वासास्तु रुद्रांशत्वादतीवकोपनः निष्पन्नः ।

अत्रिः — अनसूये ! दुर्वासा अपि पुरुषेषु असाधारणः । नियतेरिङ्गितं ज्ञात्वा यथायोग्यं दण्डं ददाति उद्धताय कालनष्टाय । महाकौलस्य साक्षात् नन्दिकेश्वरशिष्यस्य सम्बन्धे जना अप्येवं ब्रुवाणा भक्त्या- सर्वासामुपनिषदां दुर्वासा जयति

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

देशिकः सकलागमाचार्य्यचक्रवर्त्ती साक्षात् शिव एव अनसूयागर्भसम्भूतः क्रोधभट्टाभिकाख्यो मह्यमुनिः। श्रीबिद्यायाः परमशिबस्यच उपासकोऽसौ महाकालीं षडक्षरां बिद्यां त्रयोदशाक्षरोमपि उपतिष्ठते। षड्दर्शनातिरिक्तेऽर्थे सूत्रधारं भुवंश्रितः। रुद्राबतारो दुर्बासा स्तूयते सर्गकालधृक् इति कथ्यते। सोऽग्रेपि श्रीकृष्णं आगमतत्वं ज्ञापयिष्यन् कलौ अपि तत्शास्त्रस्य प्रकाशकर्त्ता भवेत्। परन्त्वस्य सम्प्रदायो बिबृद्धे कलौ लुप्तप्रायो भविष्यतीति।

अनसूया — परन्तु और्वकन्यां कन्दलीं स्वपत्नीमपि दण्डितवान्। भस्मीकृत्य बृथाशापेन अपराधशतस्यातिक्रमणात् नारी नाम का वा नापराधं करोति स्वामिनि?

अत्रिः — ललितायाः महासाधकस्य ईश्वरायुधीभूतस्य कथं गृहबन्धनं भवेद् वा तस्य। निष्कल्मषेन दुर्बाससा लोकहिताय बिचरितव्यं पृथिव्यां द्वापरान्तं यावत्। पत्न्याः अभिशापोऽपि स्वीकृतस्तेन अम्बरीषात् पराभवं प्राप्य।

अनसूया — अम्बरीषात् पराभवस्य निरोधे तस्य शक्तिः नासोत् किमु?

अत्रिः — स तु मानापनात् तुल्यभावं बहत्यन्तरे। भक्त्या प्रसादः अवज्ञया शापः सर्वमाशु प्रदत्तं तेन

CC-0. Panini Kanya Maha Vidyalaya Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

लीलया । विष्णुभक्तस्य माहात्म्यप्रख्यापनाय पत्नीशापस्य सार्थकतायै च पराभवः स्वीकृतस्तेन विमत्सरेण । उन्मत्तव्रतं तस्य स्वेच्छया गृहीतं लोकपरीक्षणाय । न तस्य प्रियाप्रिये शत्रुमित्रे । दोषे सति दण्डः मित्रे वा शत्रौ वा । इन्द्रं श्रीहीनं करोति मत्ततामालोक्य पत्नीमपि भस्मीकरोति प्रमादेषु वर्द्धितेषु तस्याः । अतिभोजने अभोजने तुल्यता एव तस्य । वहवः कृतकृत्यतां याताः यास्यन्त्येव तत्कृपया । तस्य सुन्दरी महिमा, देवीमहिम्नस्तोत्रं, आर्य्याद्विशती, ललितास्तवः, परशिवमहिम्नस्तवमपूर्वमेव । धर्मे निगूढनिश्चयत्वात् तं दुर्वाससमिति जना विदुः । वस्तुतः दुर्वाससं चीरं गृह्णाति स एव ।

अनसूया — परन्तु दत्तो मे विष्णुना दत्त एव । तस्य स्वभावो मह्यं रोचते विशेषेन । विलक्षणपुरुषोऽयं कनिष्ठपुत्रो मे । अयथारुषा न तापयति जनान् भीतिमुत्पाद्य अपितुमङ्गलं करोति सर्वेषां सामान्य स्तुतिवाक्येन ।

अत्रिः — सोऽपि योगेश्वरो भविष्यति । तस्यापि माया वर्त्तते दुरत्यया यया भ्रमयति लोकान् वयस्यानपि ।

अनसूया — योगेश्वरत्वं परिव्राजकत्वं गतेऽपि काले अहमेव भोजयामि तमिति वासना मे ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अत्रिः — एवं भविष्यत्यपि । समये स्वेच्छागमनस्य तस्य नित्यं त्वत्तो भोजनग्रहणं नहि दुष्करं । नित्यमेवागमिष्यति त्वत्सकाशं असौ कनिष्ठपुत्रः भोजनार्थमत्राश्रमं । तस्मात् तबावस्थानाच्च माहुरीपुरीयं मातापुरमितिनाम्ना ख्यातिं यास्यति चिराय । याम्यर्बुदाचलं कार्य्याय । त्वयात्र स्थातव्यमेव ।

(प्रस्थानम्)

—●—

(३य दृश्यम्)

(ऋषिकुमारैः वेष्टितः दत्तात्रेयः)

१म कुमारः—दत्त । त्वं कथमस्मत्सङ्गं हातुकामो बिभासि अतीव प्रीयोऽपि नः ?

२य कुमारः—अस्मान् दूरे कृत्वा एकाकी सरस्तीरे पद्मासने उपबिश्य योगसाधनं करोषि क्रीडायामतिमदत्वा ।

३य कुमारः— दत्त । त्वं सहसा आसने उपबिश्य बहिर्ज्ञानबिरहितः कथं भवसि । ब्रूहिनस्तत् कौशलं । तुल्यं चरामस्तपसि त्वत्शिक्षया ।

दत्तः — (स्व) एतेषां सङ्गो मोहाय एव । योगसाधनं सन्यास एव मे लक्ष्यं जन्मनः । दुष्टाः निगृहीतव्याः शिष्याः पालनीयाश्च । अत एते मयस्या बञ्चनीया

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

एव। (प्रकाशं) सखायः! मा विलम्बेन वृथा-वाक्यव्ययेन। जलक्रीडां करिष्यामः। सरसि आत्मगोपनं करोमि भवद्भिरनुसन्धेयः।

(जले मज्जनं। अलक्ष्यं गत्वा अन्तः सरसि कुम्भकं करोति)

कुमाराः — (इतस्ततः सरसि मार्गयमाणाः सन्तरणेन) क्वापि न लक्ष्यितः।

१म कुमारः—नात्र तिष्ठति दत्तः। दीर्घकालं यावत् श्वासरोधः कथं सम्भवति प्राणिनां। अपरतीरात् अलक्ष्यं पलायितं तेनास्मान् वञ्चयित्वा अथवा मृतो जलान्तः। तथा सति अस्माभिः तूष्णीं पलायितव्यं। अन्यथा विपत्तिः।

२यकुमारः— अत्रैव तीरे तस्यापेक्षां करिष्यामः। दिनान्ते नूनमागमिष्यति पलायितश्चेत्। श्वासरोधः न सम्भवति तस्य। जलस्तम्भने अभ्यस्तोऽसौ।

३यकुमारः— एष आगच्छति दत्तः सरसः अपरपारात्। पश्य ललना कापि वर्त्तते तेन सह। हस्ते पानपात्रमपि गृहीतं।

१मः — नूनं भ्रष्टोऽयं संजातः। प्रत्यहमेवं करोति अस्मद्-समवायात् पलायित्वा।

२यः — सखे! दत्तः योगिनामपि नियन्ता। बाल्यादेव हैहयराजस्य अवज्ञया स्वपितरं क्षुन्नं दृष्ट्वा अतिशैशवेऽपि किमपि कर्त्तुमारब्धवान् परन्तु

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

निवृत्तः केनापिहेतुना ।

१मः — किं वृथा प्रशसंया । पश्य । मद्यपानंकृत्वा स्खलित-वाक्चरणोऽयं सुन्दरीं क्रोडे करोति । नृत्यमपि करोति मदेन । इत्थं मदापुरुषत्वंचेत् तथा भवितुं को वा नार्हति ? मिथ्याचारः । मिथ्याचारः । आत्मप्रवञ्चना । रहसि सुन्दरीनिलये प्रच्छन्नं प्रणयं करोति कौमारादपि पुष्टशरीरत्वात् । अहं गच्छामि ।

३यः — परन्तु श्रीविद्यया उपासकस्यास्य नास्ति कुत्राप्या-सक्तिः । एवं कुर्वतोऽपि न तस्य मोहः सम्भवति ।

(लोकानां प्रवेशः)

लोकाः — दत्तोऽयं मदमत्तः सुन्दर्य्यां सह नृत्यं करोति । अत्रिकुमारः कनिष्ठत्वात् भ्रष्टो जातः । कुमाराः स्वस्व गृहं गच्छत । नैतेन क्रीडा भूयः करणीया । परिहरत सङ्गमस्य । उत्सन्नकुलधर्मायमत्रिपुत्रः बिकृतधीः निष्पन्नः । अस्याग्रजो दुर्वासा अपि उन्मत्तव्रती बर्ण्णेन हरिपिङ्गलः, दीर्घश्मश्रुः विल्वदण्डी कृशाङ्गः लम्बकायः बिचरति दुर्वास-सापिहितः दिगम्बरो वा पृथिव्यां कालात् ।

(कुमारैः सह लोकानां गमनं घृणया)

दत्तः — अथ पलायित्वा स्थानादस्मात् निभृतं तपः करि-ष्यामि गङ्गाद्वारे जाह्नवीतटे शिखायज्ञोपवीतं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

परित्यज्य निःसङ्गः सन् । विविक्तसेवा अतीव प्रयोजनीया योगसाधनाय। सङ्गात् कामः । जाह्नव्यां त्रिकालं स्नानं करिष्यामि यतः शौचात् सङ्गजुगुप्सा परैरसङ्गलिप्सा च। (प्रस्थानम्)

—●—

(४र्थ दृश्यम्)

(हरिद्वारे गङ्गातटे आश्रमं निर्माय योगसाधनं दत्तस्य)

दत्तः — अद्य गङ्गायाः तटेऽस्मिन् स्नात्वाह्निकादिकं करिष्यामि (कुशादिकं तीरे निधाय जलमाविश्य) ॐ तद् विष्णोः परमं पदं सदापश्यन्ति सुरयः दिविब चक्षुराततम् । ॐ यज्जाग्रतो दूरमुदैति दैवं तदुसुप्तस्य तथैवैति । दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु । ॐ भूर्भुवः स्वः (जपं करोति जले तिष्ठन् । गङ्गाप्रवाहेन कुशादीनां प्लावनं)

आगन्तुकः— ब्रह्मन् ! कुशादिकं ते गङ्गागर्भं प्रयाति । कथं कृत्यं सम्पादनीयं ते ? दूरे न सुरक्षितं तत् ।

दत्तः — मातः गङ्गे ! कथमयि एवमविचारः ? पूजाकर्मणि प्रतिबन्धं सर्जयसि । (किञ्चित् कुपितः) दूरं न

CC-0. Siddhanta eGangotri Gyaan Kosha Institute

Digitized By Siddhanta eGangotri Gyaan Kosha

यास्यतु मे कुशादिकं। अत्रैव जले भ्रमतु आवर्त्तं-
मत्कृत्यसमाप्ति यावत्।
(गङ्गागर्भे कुशादीनामावर्त्तनं)

आगन्तुकः— अहो महायोगी पुरुषोऽयं। योगशक्त्या गङ्गायां
कुण्डमिव संजातं यत्रावर्त्ते कुशादिकं घूर्णायमानं
तीव्रस्रोतसापि दूरे न गत्वा। मुने! अपूर्वाः
प्रभावास्ते। कुशानामावर्त्तनात् गङ्गागर्भे कुशा-
वर्त्तघाट इत्याख्यापि भवत्वस्य स्थानस्य। हरिद्वारे
ब्रह्मकुण्डे कुशावर्त्ते नराः स्नात्वा स्वर्गाय
कल्पन्ताम् इत्येव प्रार्थना मे।

दत्तः — इहापि आविस्कृतोऽहं। कथं लोकानां दृष्टिं परि-
हरिष्यामि? आश्रमं त्यज्य भ्रमिष्यामि केवलं।
वाराणस्यां स्नानं कृत्वा विश्वनाथं प्रणम्य अन्नपूर्णा-
दर्शनानन्तरं कोल्लापुरं यास्यामि लक्ष्मीदेवीं
प्रीणयितुं। तत्र उपासनान्ते मातापुरं मातुः-
समीपं गमिष्यामि भोजनार्थं पश्चात् सह्याद्रौ
स्वप्स्यामि निर्जने। एवं एवं करणीयं प्रत्यहं
प्रच्छन्नं योगशक्तिमाश्रित्य आत्महिताय। न
जनेभ्यः उद्वेगः स्यात् भिक्षाहरणात्। माहुरी-
पुरे माता मे तपः करोति। तत्रैव भिक्षा ग्रहणीया
योगशक्त्या शून्यगमनेन। (प्रस्थानम्)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(प्रथम दृश्यम्)

(रैवते दत्तबिश्रामस्थले देवानां प्रबेशः)

देबाः — अवधूताचार्य्याय नित्यदिगम्बरपुरुषाय नमोनमः। दत्तात्रेय। जनैःदुरवागाह्यं ते चरितं। हे गूढ-चरित! हे महात्मन्! बयमुत्पीडिताः यातुधानैः। इदानीमन्वीयमाना अपि तैः शस्त्रपाणिभिः। परित्राहि नो घोरसंकटात् अस्मात्। बयं त्वां प्रपन्ना एव सर्बथा।

दत्तः — (स्वं) देबाः स्तुतिबाक्येन मां प्रसादयन्ति बिपन्नाः सन्तः बृहस्पतेरुपदेशात्। नूनं रक्षणीयास्ते। (नेत्रमुन्मील्य) देबा स्वागतं बः। सुरेश्वर! स्वयं बज्रपाणिरपि किमर्थमत्रागतः निरस्त्रस्य अहिंसा-व्रतिनः मुनेराश्रमपदं।

देबाः — किमज्ञातं सर्बज्ञेन? रक्षणीया बयं भबता यतः अनन्यगतिका इदानीं।

दत्तः — तर्हि गच्छत। युद्धं कुरु असुरानाहूय।

देबाः — (असुराणां आक्रमणं सहसापि सर्बतः)। किमत्र करणीयं। (लक्ष्म्याः आबिर्भाबः दत्तपार्श्वे)

असुरा — (लक्ष्मींदृष्ट्वा मोहिताः) अबश्यं नेतव्येयं सुन्दरी बलात्। किमयं करिष्यति दिगम्बरो देबा वा?

(बलान् नीत्वा लक्ष्मीं तेषां पलायनं)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दत्तः — (उच्चैः विहस्य) देवा । प्रवञ्चितास्ते राक्षसाः । दिष्ट्या यूयं विजयिनः इदानीं स्वस्थानं याहि निरापदतया । समये जम्भासुरं हनिष्यथ । लक्ष्मी-देवी आगमिष्यति च ।

(देवानां प्रणामः प्रस्थानं च)

(षष्ठ दृश्यम्)

(दत्तात्रेयं विचरन्तं पश्यति महाराजः यदुः)

यदुः — कोऽयं तरुणो विप्रः वनपथेऽपि विचरत्यकुतोभयं ? अकर्तुरपि निपुणता प्रदर्शितेवास्य । विद्वानपि बालवद् विहारशीलः निरभिमानात् । सुभगः उदारवचनोऽपि जडोन्मत्तपिशाचवत् व्यवहरति । (गत्वा प्रणमति) महात्मन् । कौतूहलात् प्रष्टुमिच्छामि । भगवन् न ते कर्त्तव्यं कर्मप्रवृत्तिः वा तथापि त्वयि अभावबोधः न जायते कस्मात् । चिरप्रसन्नः विहरसि निःस्वत्वेऽपि ।

दत्तः — राजन् । गुरुशिक्षायाः फलमेतत् । चतुर्विंशतिरेव गुरवो मे निसर्गसृष्टौ विराजमानाः येभ्यः शिक्षां प्राप्य स्वच्छन्दं विचरामि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

यदुः — के ते गुरवः। कथं वा शिक्षा तेषां।

दत्तः — श्रुणु तर्हि। पृथिव्याः क्षमाधैर्य्यं, आकाशादस्पर्शं, जलात्स्निग्धतां, अग्नेः तेजस्वितांप्रच्छन्नतां, अजगरसर्पात् अयाचनां, समुद्रात् गाम्भीर्य्यं प्रसन्नतांच, मधुमक्षिकायाः असंचयं, वेश्यायाः अशाश्वागं, बालकात् निरभिमानं, सर्पात् निर्जनवासं इत्यादयः।

यदुः — परन्तु एवं शिक्षाग्रहणं क्वचित् महापुरुषाणां भवत् विधानां केवलं सम्भवति। नित्यदृष्टा अपि एते त्वया एव गुरुत्वे वृताः न अन्येन एतावतापि। एवं सूक्ष्मदर्शने को हेतुः ?

दत्तः — राजन्। मृत्युः शरीरं अनुसरति निरन्तरं। योनयः अशेषाः। विषयाः बहवः। अतः समये यतस्व। सतामाराधनमेवात्र कारणं। (आलिङ्गति यदुं)

यदुः — (पल्लविति इव) स्पर्शात् पराशान्तिः प्रसृता चेतसि। न सन्देहोऽपि जायते। आश्चर्य्यकर्मायं अवधूत-वरः। एनं गृहे पूजयित्वा जीवामि।

दत्तः — (विहस्य) गन्धवहं न कोऽपि निरोद्धुं समर्थः। स तु पावयति सर्वतःप्रसारात्। एवं वयमपि। सन्तः सेव्या विनयादेव अप्रमत्तेन चेतसा।

(अन्तर्द्धानम्)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(७म दृश्यम्)

(हैहयराजभवने कृतबीर्य्यस्य मन्त्रिणः)

मन्त्रिणः — कार्त्तबीर्य्य अर्जुन ! राज्यधुरस्य बोढासि पितरि कृतबीर्य्ये दिवंगते ।

अर्जुनः — मन्त्रिणः ! नहि मे राज्येन प्रयोजनं । राजधर्मस्य पालनं न सम्भवति मे यतस्तत् योगशक्तिमपेक्षते । तथा शक्त्याहीनस्य मे राज्येन किम् ? तस्मात् तपसा शक्तिमाप्नुयां चेत् राज्यभारं नेष्यामि न चान्यथा ।

गर्गः — एवं चेत् त्वं महायोगिनं दत्तात्रेयं भगवन्तं आराधय यत्प्रसादेन अनायासेन तपस्यां विनापि शक्तिं प्राप्स्यसि । प्राक् देवा अपि तदाश्रयात् स्वर्गमवाप्नुवन्तः असुरान् विजित्य ।

अर्जुनः — न केवलं चित्तसंयमः परन्तु वीरत्वमपि नृपत्वे अपेक्षते दुष्टेभ्यः रक्षणाय राज्यस्य ।

गर्गः — तदपि तस्यैवाबधूतस्य प्रसादात् सम्भविष्यति । पुरुषार्थचतुष्टयमपि दातुं समर्थोऽसौ भगवान् दत्तात्रेयः । तस्मादेव परशुरामः श्रीविद्याया रहस्यमधिगतवान् । साक्षात् गणेशः कार्त्तिकयोऽपि तस्मादेव ब्रह्मविद्यां प्राप्तवन्तौ । एवं यदुः पुरुरवा आयुरादि राजानोऽपि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अर्जुनः — एवं चेत् तमहं यास्यामि आराधयितुं । परन्तु क्वास्ते स महात्मा ? किं लक्षणं वा तस्य ?

गर्गः — अव्यक्तलिङ्गोऽयं मह्यापुरुषः अवधूताचारं निर्वाहयति । नाश्रमो न वा बाह्यलिङ्गानि कानिचित् । क्वचित् दण्डकमण्डलुधरः डमरुवादनान्ते शङ्खमापूरयति वायुना । क्वचित् आनन्देन यानारुढः जटी कुण्डली त्रिपुण्ड्रमालाधरो वा । निगूढलक्षणो विचरति पृथिव्यां यदृच्छया भक्तानां मङ्गलं बिचिन्तयन् । विष्णोरंशावतारोऽयं धर्मस्य वेदस्य यज्ञस्य च व्यवस्थापनाय । तथापि कानिचित् बाह्यलक्षणानि दृश्यन्तेऽस्य । दिगम्बरः समानपात्रः स्वभिरनुयातः कदाचित् शवसुन्दर्य्योःतुल्यबोधं अनुभवन् विचरति । क्वचिन् मौनी क्वचिदुन्मत्त इव क्वचित् भिक्षाजीवी क्वचित् महाराजस्य विभवं तृणं मन्यते च । शरीरं तस्य अपारदीप्तिमत् अयत्नेऽपि ।

अर्जुनः — तर्हि मया उपासितव्यः । यामि प्रसादयितुं तं सेवया विनयेन च । (गर्गाचार्य्यं प्रणमति)

गर्गः — सिद्धकामो भव । (प्रस्थानम्)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(८म दृश्यम्)

(नर्मदातीरे कार्त्तवीर्य्यार्जुनः दत्तात्रेयस्यान्वेषणे । मुनीन् वीक्ष्य)

अर्जुनः — मुनयः ! प्रणामो मे युस्मद्भ्यः । दत्तात्रेयस्य दर्शनप्रार्थी अहं बसाम्यत्र नर्मदातटे ।

मुनयः — नित्यपरिव्राजकोऽयं महामुनिः भक्तानामार्त्तिनाशाय सर्बत्र एव सुलभः । अन्यथा तस्य गूढलिङ्गिनः न बासस्थानं नियतं । स्मरणादेब आबिर्भबति तस्मात् तं स्मृतिगामी स्मृतिमात्रानुगन्ता इति कथयन्ति । स एव धर्मदेवस्य साक्षात्कारं कृतवान् तस्मात् तं धर्मबिग्रहीति बुधा आहुः । राजन् सोऽपि एवं बर्णितः जनैः—

बाराणसी पुरस्त्रायी कोल्लापुरजपादरः
माहुरीपुरभिक्षाशी सह्यशायी दिगम्बरः ।

त्वमत्रैव तस्याराधनं कुरु एकाग्रेण मनसा दर्शनं दास्यति सोऽबश्यं आशुतोषत्वात् मातापुरगमनस्य पथि ।

अर्जुनः — एवं स्थितः पश्यामि दिनानि तन्मार्गं ।

(ऋषीणां प्रस्थानं । दत्तात्रेयस्याबिर्भावः)

दत्तः — पुत्रक ! कथमत्र स्थितः असि दत्तात्रेयमनुसरन् उन्मत्तः मद्यपायी स्त्रीलालस इति कथयन्ति यं ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अर्जुनः — (विलक्षणरूपं दृष्टवा स्वं) अयमेव दत्तात्रेयो भवितुमर्हति। अवधूतस्य आदर्शं दर्शयन् चिराय जम्बुद्वीपे विहारशीलः दयया दर्शयति मां स्वरूपमत्यद्भुतं। अहो। अस्य शीर्षत्रयं नूनं सद्-गुरोः ब्रह्माविष्णुमहेश्वरात्मकत्वख्यापनाय। करषट्-केनापि त्रिदेवानां षडायुधानि शङ्खचक्रडमरुत्रिशूला-क्षमालाकमण्डल्वादिनि दधानः। पदयोः काष्ठपादुके। कण्ठे रुद्राक्षमाला सृष्टविश्वानां संख्यां संसूचयन्तीव। चतुःसारमेयरूपेण चतुर्वेदा अनुसरन्तीव संरक्षि-तास्तेन। पार्श्वेऽपि कासधेनुः धरणीरूपिणी। नूनं भगवान् दत्तात्रेयोऽयं। इतरैरसम्भावितमित्थं रूपं कथं जानासि मदभिप्रायं वा। शारीरलक्षणैरपि रूपं एवमनुमीयते। (प्रकाशं) धन्योऽहं संजातः भवद्दर्शनात्। प्रणामस्ते पदयोः। (पतति पदे) विष्णुरूपत्वात् दर्शनादेव कृतार्थता जनिता मयि।

दत्तात्रेयः— विनयेन तृप्तोऽहं। ब्रूहि किमभिमतं।

अर्जुनः — महाबाहो। समरे चमूमध्ये सहस्रबाहुः भविष्यामि गृहे तु चान्यथा। विक्रमेण कृस्नां महीं प्राप्य धर्मेण पालयिष्यामि अतन्द्रितः। भगवन् कदाचित् उत्पथप्रतिपन्नतायां श्रेष्ठपुरुषः मां शासयिष्यति दण्डेन। जलेस्थले अव्याहतगतिः सन् सर्वेषा-मन्तरं ज्ञातुं शक्नोमि यथा तथा वरान् देहि।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

उत्तमा अतिथयः सन्तु मे। दानादपि न धनस्य क्षयः स्यात् कदाचिदपि। त्वयि चानन्यभक्तिरस्तु मे।

दत्तः — एवं सर्वं भवन्तु ते।

नहिते कार्त्तवीर्य्यस्य गतिं यास्यन्ति पार्थिवाः
यज्ञैर्दानैस्तपोभिर्वा संग्रामे चातिचेष्टितैः।

(अन्तर्द्धानं)

अर्जुनः — प्रभोः सन्निधिरेव परमाश्रय आसीत्।

य आप्तकामो मुदितः प्रणत्या
मां क्षौभगर्भात् कृपयोद्दधार
विनष्टद्वन्द्वं पुरुहूतबन्द्यं
दत्ताभिधानं मुनिमानतोऽहम्।

(९म दृश्यम्)

(कार्त्तवीर्य्यस्य आस्फालनम् राजसभायां)

अर्जुनः — दत्तप्रसादात् निखिलावनी मे निर्जिता एव। धैर्य्येण बलेन, यशसा पराक्रमेण च कोऽत्रास्ते मत्समो पृथिव्यां। न ब्राह्मणा अपि यतस्ते आत्मसम्भाविताः भिक्षावृत्तयः मामपि समाश्रिताः। को मां राज्यात् भ्रष्टं कर्तुं समर्थ इदानीं वा।

CC0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

सभासदः — मौनाः तिष्ठन्ति बिस्मिताः

(वायुदेबस्य आबिर्भावः)

बायुः — राजन् महत्त्वात् ब्रह्मभूतिः त्वत्तोऽपि गरीयसी एव। सदैव क्षात्रतेजो नियमितो ब्रह्मबर्चसा। पश्य गौतमबीर्य्यं पुरन्दरस्यापि शासनं कृतं येन अहल्या दूषणात्। एवं सगरपुत्राणामपि दुर्द्दशा कपिल-क्रोधात्। दण्डकस्य राज्यं एकेन एव भार्गवेण नाशितं आचमनमात्रेण। बिश्वामित्रोऽपि ब्राह्मणत्वाय प्रलुब्धः सन् यतते स्म। मानसतीरे दैत्यान् निर्दह्य गङ्गास्रोतसः गतिं व्यावर्त्तयन् सरोबरभेदनात् सरयु- नामनदीं प्रवाहयामस महातेजा बशिष्ठः। च्यवनोऽपि अश्विनीकुमाराभ्यां यज्ञभागं ददौ इन्द्रं स्तम्भीकृत्य मदसंज्ञया कृत्यया। तब बरदातुरग्रजेन दुर्बाससा मुण्डितमस्तकेनापि इन्द्रसंपदः नाशिताः। अतः राजन् अप्रमत्तो भव ब्राह्मणेषु।

अर्जुनः — भबान् नमस्य एव निर्भीकसत्यभाषणात्। एबं सत्यबादिनं निश्चिनोतुमेब ममेत्थं आस्फालन-मासीत्। बिभो अहं सर्बदा एव ब्राह्मणानां हिताय जीबामि। मम बरदाता महात्मा दत्तात्रेयः आत्रेय पव। भवतः परिचयं ज्ञातुमिच्छामि।

बायुः — बायुदेबोऽहं तब हिताय उपस्थितः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अर्जुनः — प्रणामं गृहाण मे प्रभो ।

बायुः — प्रसादितोऽहमिदानीं । परन्तु राजन् भृगुवंशीय-ब्राह्मणात् महद्भयं भविष्यत्येव ते । तेषां द्रोहं मा समाचरेः । दीर्घकालान्तरमेव तेन ते पराभवः । इदानीं धर्मेण शीलेन बिनयेन च महीं पालय ।

(अन्तर्द्धानं)

अर्जुनः — बिष्णुरपि भीतो भृगुवंशीयेभ्यः पदप्रहारलाभात् । ब्राह्मणान् तोषयिष्यामि धनेन जीबितैरपि । धर्ममेव चरिष्यामि ।

सभासदः — साधु । साधु महाराजः ।

—●—

(१०म दृश्यम्)

(राज्यभ्रष्टस्य अलर्कस्य दुःखेन बिचरणम्)

अलर्कः — अहो दुर्भाग्यं मे । मद्भ्राता सुबाहुना एव प्रेरितः सन् काशीराजः मामाक्रान्तवान् । परन्तु अत्रजो मे महात्मा एव बाल्यादपि प्रव्रज्यां गृहीतवान् राज्यं अनादृत्य । किमत्र हेतुः स्याद्बान्यथा । (सहसा प्रकाशिस्थः) भगुः महालसादेव्या प्रदत्तमंगुरीयकं

CC-0. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

वर्त्तते मत्सन्निधौ । तस्मिन् किमपि लिखित-
मासीदपि । पश्यामि इदानीं (पश्यति)
सङ्गः सर्वात्मना त्याज्यःकामो हेयस्तथाविधः
मुमुक्षा च सतां सङ्गः अशक्तौ खलु भेषजे ॥
मातुरनुशासनमेवेदं मत्कृते । किं करिष्यति दुर्भाग्यं
मे । मोक्षकामो महायोगिनं दत्तात्रेयमुपयामि ।
महापुरुषप्रसङ्गात् दुःखस्य हानिः स्यात् सर्वथा ।
अतः वाराणसीं गन्तव्या दत्तसाक्षात्काराय ।

(दत्तात्रेयस्य प्रवेशः)

दत्तः — वाराणसीगमनेन न प्रयोजनं । अहमत्र भो अलर्क ।
मातृभक्त्या ते विगलितोऽहं ।

अलर्कः — नमामि महायोगिनम् । मदालसापुत्रः अलर्कोऽहं
अधुना राज्यभ्रष्टः विचरामि शत्रुपीडितः ।

दत्तः — (मनसा शक्तिपातं कृत्वा) वत्स अलर्क । अद्यैव
सकलदुःखानामुपशमः करिष्यामि ते । ब्रूहि
कस्मात् ते दुःखमुत्पन्नम् के वा ते रिपवः ?

"इन्द्रजालमिदंसर्वं यथामरुमरीचिका,
अखण्डितमनाकारो वर्त्तते केवलं शिवः"
नतेच माताच पिताच बन्धुः,
नतेच पत्नी न सुतश्च मित्रम्
न पक्षपातो न विपक्षपातः
कथं हि सन्तप्तिरियं ह चित्ते ?"

(दत्तात्रेयस्य प्रचोदनात् अलर्कस्य भावान्तरं)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अलर्कः — (स्व) कथं मे दुखं जातं कस्माद् वा ? दुःखं तु देहबुध्यादीनां । अहं तु तेभ्यः बिलक्षणः । परन्तु (चमत्कृतः) एतावता महीं भ्रमितबानहं दुःखितः सन् । कालात्संचितस्य दुःखस्य सहसा अभाबबोधः । परमकारुणिकस्य महापुरुषस्य सन्निधिमात्रेण एब एतत् सम्भबति भाबान्तरं कालेन तपसापि न सिध्येत यत् । (प्रकाशं) महात्मन् ! नहि मे दुःखबोधः इदानीं किञ्चिदपि । रिपबः के ते न जानामि निश्चयेन । परन्तु एवं प्रत्ययः आसोदेव अज्ञानात् एतावता ।

दत्तः — अलर्क ! नहि दुःखं नाम किञ्चित्बस्तु बिद्यते । ममता एब दुःखस्य निदानं । इयं ममता अनादि-कालात् सम्बर्द्धिता बृक्ष इब यत्छायायां संसार श्रान्तपथिकः बिश्राम्यति, परन्तु बृथा । सत्सङ्ग एव कुठारोऽत्र येन छेदनं बिना न शान्तिर्मुक्तिर्बा । एवं दुःखस्य अभाबे जाते सुखं स्वतः जायते ।

अलर्कः — भबत्कृपायाः जडचेतनयोः भिन्नत्बबोधेऽपि अतीबचञ्चलत्वात् चेतसः तन्निग्रहा उपायं ज्ञातुमिच्छामि ।

" धमादौमोक्षपर्य्यन्तं निरीहाःसर्बथाबयं
कथंरागबिरागैश्च कल्पयन्ति बिपश्चितः । "

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दत्तः — राजन्। एकैव चित्शक्तिः विद्यतेऽत्र नान्यत् इति ज्ञानात् न मित्रारिप्रभुभृत्यता । तस्मात् काशीराजः सुबाहुर्वा न केऽप्यपकारिणस्ते। वद कोऽस्ति ते रिप्वन्तरं यस्य निग्रहमिच्छसि ? अलर्क ! विवेकविज्ञानं चिराय साधनमपेक्षते। गुरुसेवया सुलभं स्यात्। (शिरस्पर्शं करोति)

अलर्कः — (प्रबुद्धः योगिनः स्पर्शेन) प्रभो! न मे किञ्चित् प्राप्तव्यमस्तीदानीं । एवं प्रसादाः मयि अधमे सन्तु ते चिराय। प्रणमामि त्वां।

दत्तः — चिरं जीव। चिरं जीव। मातुः मदालसायाः प्रसादेन चिरयौवनं प्राप्तोऽसि त्वं। मत् कृपया स्वराज्यं पुनः प्राप्स्यसि। (अन्तर्द्धानम्)

अलर्कः — (दुखितः) अहेतुकी एव करुणा महात्मनां।

शरद्घनाभं शरबिन्दुवक्त्रं
योगेश्वरं तापहरं जनानाम्
स्पर्शेण दृष्ट्यापि हरन्तमेनः
श्रीसद्गुरुं दत्तमुनिं नतोऽस्मि।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(११वं दृश्यम्)

(काबेरी नदीतीरे भूमौपतितः दत्तात्रेयः)

प्रह्लादस्य प्रवेशः

नेपथ्ये — "शून्यागारे समरसपूतस्तिष्ठन्नेकः सुखमवधूतः ।
चरति ही नग्नस्त्यक्त्वागर्वं
बिन्दति केवलमात्मनि सर्वम्"

प्रह्लादः — (प्रणम्य) ब्रह्मन् ! भवद्दर्शनात् कौतूहलं चेतसि जायते। तन्निराकरणाय किञ्चित् प्रष्टुमिच्छामि। दोषे सति क्षन्तव्योऽस्मि। महात्मन्। धूमाच्छन्न-बह्निरिव शरीरं ते भोगिजनोचितं पुष्टं च दृश्यते। परन्तु वित्तमुद्यमवतां हि सम्भवति येन भोगः सुलभःस्यात्। चिराय सुखं शयानस्य कथमुद्य-मस्ते। तस्मात् अर्थहीनत्वेऽपि कथं पृथुलमिदं शरीरं ते ?

दत्तः — असुरराज ! एतास्मदेव बुधैः सम्मानितस्त्वं। हृदि चास्ते नारायणस्ते यः सर्वं प्रचोदयति। तथापि कथयामि किञ्चित् तव जिज्ञासया। श्रीविद्याया उपासकोऽहं।

"कथमिहदेहविदेहविचारः कथमिहरागविरागविचारः
निर्मलनिश्चलगगनाकारं स्वयमिह तत्वं गहनाकारम्"

प्रह्लादः — इन्द्रियविषयेषु अनासक्तः कथं विहरसि बालकवत् पृथिव्यां निरीहः ?

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दत्तः — प्रह्लाद! तृष्णा अपूरणीया। सैव भववाहिनी। सर्वे मृत्युवशाः। आकाशतारा अपि समये पतिष्यन्ति। अतः अखिलं मृत्युवशं दृष्टवा समबुद्धिर्मे सर्वत्र। तस्मात् अनायासलब्धेन द्रव्येण जीवामि। न मे काचित् वासना मर्त्ये वा स्वर्गे वा। तस्मात् कदा भूरिभोजनैः अभोजनैर्वा अजगरवृत्त्या जीवामि यावदायुः। अतः क्षौम चीरं अजिनं वा गृह्णामि दिष्ट्याप्राप्तं अन्यथा दिग्वाससा विचरामि। क्वचित् तृणपर्णाश्मभस्मसु धरातलेषु क्वचिद् वा प्रासादपर्य्यङ्के परेच्छयैव स्वपिमि। तथैव क्वचित् स्नातोऽनुलिप्ताङ्गः भस्मभूषितो वा चरामि। स्वभावविषमं जनं न स्तौमि न निन्दयामि वा। सर्वेषां श्रेय एव कामयमानः निरीहः पतितोऽत्र। सुगुप्तं मे आत्मवृत्तं कथितं ते भगवत्परत्वात् यत् लोकशास्त्राभ्यां परे वर्त्तते। परात्मनि नारायणे भक्तिं कृत्वा चिरं जीवतु भवान्। "त्रितयतुरीयं नहिनहि यत्र निन्दति केवलमात्मनि तत्र। धर्मामर्मौ नहि नहि-यत्र बद्धो मुक्तः कथमिह तत्र"

CC-0. Panini Kanya Maha Vidyalaya Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

प्रह्लादः — कृतकृत्योऽहं महात्मन् प्रसादात्ते । प्रणमामि ।

(दत्तस्यान्तर्द्धानम्)

प्रत्यक्षनारायणोऽयं भगवान् दत्तात्रेयः ।

बिन्दति बिन्दति नहि नहि यत्र छन्दो लक्षणं नहि नहि तत्र
समरसमग्नो भावितपूतः प्रलपति तत्वं परमबधूतः ।



(१२श दृश्यम्)

(बनपथे विचरणं साध्यगणानां अकस्मात् दत्तात्रेयस्य दर्शनं)

नेपथ्ये — "रथ्याकर्पटविरचितकन्थः पुण्यापुण्य विवर्जितपन्थः
शून्यागारे तिष्ठति नग्नः शुद्धनिरञ्जन समरसमग्नः ।"

साध्याः — (प्रणम्य) महर्षे ! वयं साध्यदेवाः । भवन्तं दृष्ट्वा
न किञ्चदनुमातुं शक्नुमः । बहुश्रुतस्य भवतः
कांचिदुदारवाणीं श्रोतुमिच्छामः ।

दत्तः — साध्याः । अतिवादं न वदेत् वादयेत् वा ।
अनाहतः न प्रतिहन्यात् घातकं घातयेद् वा
इतरैः । यादृशैः सन्निविशते तादृगेव भवति जनः
यथा वासो रङ्गवशं भवति । तस्मात् सन्तः
सेवनीया हितमिच्छद्भिः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

साध्वाः — महामते ! बहवो धन्यतां गता त्वया अनायासेन । पुरा यदुराजस्य निमेषेन मोहस्य नाशकः त्वमेवासीः आश्लेषदानात् केवलं । परशुरामः भार्गवः त्वत्त एव श्रीविद्यामलभत । आचार्य्याणामाचार्य्योऽसि त्वमाश्चर्य्यप्रभवः महात्मन् अस्मत् प्रार्थनया चिराय धरातले दुःखीनां मुमुक्षूनां च दुःखापनोदनं कुरु एवं रूपेण अवधूतचर्य्यया विचरन्नपि ।

दत्तः — अस्त्वेवं । साध्वाः । आत्मक्रीडानां महापुरुषाणां स्वतन्त्रचरितानां गतिः देवैरपि नैवोपलभ्यते किं पुनः साधारणैः । तथापि गुरुत्वं वहामि साधकानां दुःखलाघवमापादयितुं परन्तु प्रच्छन्नतया । क्वचिद् महाभाग्यवन्तः पुण्यविपाकात् कदाचित् कदाचित् मां द्रष्टुमर्हन्ति मत्कृपया । यथा पूर्वं तथा परतः अपि गोरक्षशङ्करनागार्जुनादयः मत्साक्षात्कारं प्राप्स्यन्ति समये । शुचीन्द्रं, मातापुरं, अर्बुदाचलं, रैवतः, वाराणसी, कोल्हापुरं च मम विश्रामस्थलानि भविष्यन्ति । प्रत्यहमागमिष्यामि तत्र तत्र नित्यकर्माङ्गभूततया । रैवते वाराणस्यां च पादन्यासो रक्षितो मे स्मृत्यर्थं । मत्शिक्षाश्च ग्रन्थीकृताः कैश्चित् शिष्यप्रशिष्यैः यथा-दत्तगीता, अवधूतगीता, योगशास्त्रं, वर्णप्रबोधः,

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अद्भुतगीता, विद्यागीता, स्वात्मसम्वित्युपदेशः, दत्तोपनिषत्, दत्तात्रेयतन्त्रं, दत्तात्रेयपटलः, दत्तात्रेयसंहिता, दत्तहृदयमित्यादयः। "द्रां" इति-मन्मन्त्रेण मां पूजयित्वा जनाः स्वस्य कामान् लप्स्यन्ते एव। अधुना प्रच्छन्नं विचरिष्यामि। न भूयोऽवलोकनं मे। मङ्गलं वः भूयात्।

"त्वद्यात्रया व्यापकता हता ते,
ध्यानेन चेतः परता हता ते
स्तुत्यामयावाक्परता हता ते
क्षमस्व नित्यं त्रिविधापरधान्"
(अन्तर्द्धानम्)

साध्याः — (विषण्णाः अदर्शनात्)

जम्बुद्वीपे महाक्षेत्रे मातापुर निवासिने
दिगम्बराय दिव्याय दिव्यरूपधराय च
अवधूताय शान्ताय परब्रह्मस्वरूपिणे
जराजन्मविनाशाय दत्तात्रेय नमोऽस्तुते।

श्रीश्रीगुरवेर्पितमस्तु।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

जयगुरु

महामुनिनरनारायणम्

(१म दृश्यम्)

(हिमशीतले बदरीक्षेत्रे नारायण ऋषेः प्रवेशः नरऋषिणासह)

नारायणः— नर ! पुण्यमिदं बदरीवनं मह्यं रोचते तपसे। पुरः प्रवहमाना लोकपाविनी अलकानन्दा । परितः तुषारशुभ्रगिरिमाला । न कोऽपि हिंस्रोऽत्र पशवोऽपि । तपश्चर्य्याया आदर्शस्थापनाय आवयोरवतारः । अत्रैव तपः समास्थास्येऽहं कल्पान्तं यावत् । त्वं तु कल्पेकल्पे मम सहचरोऽसि । मत्सन्निधौ स्यातव्यं ते मत्सेवया तपसा च अस्य न्यग्रोधतरुमूले ।

नरः — अस्त्वेवं देव ! भवान् हि खलु सर्वात्मा सनातन ऋषिः प्राक्सृष्टौ प्रभवति जगन्मङ्गलाय। जन्मत एव निर्मोहः वशीकृतमायः । अपूर्वलक्षणानि वपुषि धारयसि। हस्ते हंस चिह्नं, चरणे चक्रलाञ्छनं, शिरसि जटामण्डनं च। बाहू विशालौ, ललाटं प्रशस्तं, नासिका मनोहरा मुखमण्डलं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

रमणीयं। दिगम्बरत्वेऽपि शोभा अनुपमा। मेघ-
गम्भीरं बचनं दिश आपूरयति मधुरस्वरेण।
योगेन भवदङ्गसम्भूतस्य मे का वा इच्छान्तरं भवेत्
सन्निधिवासमन्तरेण। (प्रणमति चरणे)

नारायणः— अबिकलं मद्रूपोऽसि बपुषा, वलेन, गुणेन,
शीलेन च। अत्र तिष्ठतु मे कमण्डलुः। वल्कलं
धारयित्वा आसने उपविशामि।

(ध्याने मनोनिबेशः चक्षुषोः नीमिलनेन)

नरः — अत्रैव नित्यपुरुषस्य मत्प्रभोः नारायणस्य सेवया
ध्यानेन तपसा च कालो नेयो मे तपोबिघ्नानि
मोघीकृत्य। अप्रतिमप्रभावस्य जगन्मयस्य को वा
प्रभवेत् बिघ्नमापादयितुं। निरीहस्यापि अपूर्वा
चेहा तपसि। बरदातुः अप्रमेयस्य ब्रह्मणोऽपि
बेदप्रबोधकस्य कथं वा कृच्छ्रसाधनं? इच्छामयस्य
लीलेयं सर्बथा जीबबुद्धिमतिक्रामति एव। जगद्-
रहस्यं को वालमुद्घाटयितुम्।

(तपसि सन्निवेशः)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(२य दृश्यम्)

(समाधिस्थयोः नरनारायणयोः पुरतः तपोभीतस्य इन्द्रस्य प्रादुर्भावः)

इन्द्रः — अहो नासयणऋषेः तपसोज्ज्वलशरीरतेजसा दिशः समाच्छना इव । दुर्निरीक्षो देवैरपि अनुमतिं बिना । कथं वा दुष्करेयं तपश्चर्य्या ? उर्द्ध्वबाहुः वायुभक्षः तपःयेकपादेनापि तिष्ठन् वर्षाणि । येन केनाप्युपायेन तपसो भङ्गः कार्य्यः । नोचेत् इन्द्रत्वं विपन्नमेव । (समीपं गत्वा) धर्मनन्दनौ ! तपःसाधनेन युवयोः परंप्रीतोऽहं देवेन्द्रः वरं दातुमागतोऽत्र । ब्रूहि किमभीष्टं क्रमेण । अवश्यं दास्यामि ।

नरनारायणौ— (शान्तनिश्चलौ)

इन्द्रः — (उत्तरमप्राप्य पुनः कथयति पूर्ववत्) धर्मनन्दनौ तपःसाधनेन युवयोः परंप्रीतोऽहं देवेन्द्रः वरं दातुमागतोऽत्र । ब्रूहिकिमभीष्टं क्रमेण । अवश्यं दास्यामि । (अनुत्तरे क्रुद्धः) देवराजस्यापि मे न सत्कारः आभ्यां तपोदर्पात । भङ्गार्थं भीतिमुत्पादयितव्या चेतसि । प्रभञ्जन ! झञ्झावातैः भायय । जलदाः ! प्रलयवृष्टिं कुरुत । हुताशन ! बने प्रसार्य्यमात्मानं मातङ्गसिंहान् प्रेरयात्र ।

(विफलतामालोक्य पुनःस्मरतिकन्दर्पं)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

कन्दर्पः — (आविर्भूय) नमोऽस्तु देवराजाय। किमर्थं स्मरसि मां ?

इन्द्रः — मनोभव। मत्प्रीतये स्वविक्रम दर्शय अनयोः चेतसि। रम्भा, पुष्पगन्धा, तिलोत्तमा, काञ्चनमालिनी प्रभृति वरापसरसः अपि ते सहायकाः भवन्तु वसन्तेन सह। अतीव भीतोऽहं धर्मपुत्रयोः अनयोः नरनारायणयोः तीव्रतपसा। मम वरयाचना निष्फला संजाता। वृष्टिप्रभञ्जनानलप्रभावा अपि व्यर्थाः दृष्टाः। सिंहव्याघ्राश्च शान्ताः संजाताः समीपे एतयोः। अधुना त्वमेव मे परमाश्रयः। स्वगौरवं प्रमाणय।

कन्दर्पः — देवेन्द्र! निश्चिन्तेन मनसा स्वपुरीं प्रयातु मघवान्। अवश्यं कृत्यं साधयिष्यामि सत्वरम्। परन्तु कामबीजेन महाशक्तेरुपासकेषु नहि वाणानां प्रभावाः मे। (वसन्तावेशात् पुष्पाणि मुकुलितानि मलयमरुता। कोकिलानां मधुरं गीतं। रम्भादीनां नृत्यगानं च। समाधिभङ्गः)

नारायणः— (परितः विलोक्य। स्वगतं) देवराजस्य कुटिलतेयं। अस्तुतावत्। (प्रकाशं) कामदेव! अपसरसः! निर्भयं तिष्ठत अस्यां वनभूमौ। सुरलोकात् समागताः यूयं। अतः अतिथय एव। सत्कारं करवाणि वः। (पुष्पपल्लवेन उरौ चित्रं विलिख्य

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

मन्थनं कृत्वा निर्गतमलीमसैः पितुलां कृत्वा जीवन्यासेन संजीवयति। क्षणेन परमसुन्दरी रमण्याः-सन्भवः) कन्यके उरुसम्भवात् उर्वशीनामासि। सत्कारं कुरु एतेषाम्।

(कामदेवस्य अप्सरसां च भयबिस्मयं च युगपत्)

कन्दर्पः — (प्रणम्य) प्रभो! अहंकारात् सापराधोऽस्मि। पर्वते कथं प्रभवति बा मरुत्प्रकोपः? मायायाः पारे-तिष्ठति भवान्। आत्मारामानां मनस्विनामपि ध्येयोऽस्ति ते पदकमलं यतस्तेऽपि क्रोधेन नाशं कुर्वन्ति क्वचित् स्वतपसः। अक्रोधन! त्वदाश्रितानां कुतोऽपि भयं न सम्भवति। इन्द्रप्रीणनाय एवायमारम्भो मे।

नारायणः— अनङ्ग! प्रसन्नोऽस्मि भक्त्या। न ते मनागत्र दोषो विद्यते। उर्वशीं गृहीत्वा इन्द्रसमीपं याहि। अमरावतीमलंकरिष्यतीयमवश्यम्।

अप्सरसः— भगवन्! नह्यस्माभिः गन्तव्यं स्वर्गाय। उर्वश्या सह गच्छतु कामदेवः। वयं ते नयनमुग्धः संजातः। प्रसन्नश्चेत् स्वीकुरु नः। धन्यजन्मानः एव वयं जाता भवद्दर्शनात्। नूनं पुण्यबिपाकात् एतत् सम्भवति।

नारावणः— नर! अहङ्कारस्य इयं परिणतिः। सम्भाषणस्य अयमेव परिणामः। आदौ नीरखता गृहीता चेत्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

इत्थं विपत्तिः न स्यात्। क्रोधेन निगृहीताश्चेत् एताः मां शपन्त्यः पलायिष्यन्ति। अनन्तरं भूयः तपः करिष्याम्यहं निश्चिन्तेन चेतसा। परन्तु क्रोधेन तपः क्षयः।

नरः — एवं क्रोधाहंकारात् वयं प्राक् महत्कष्टं लब्धवन्तः। अतः क्षमस्वापराधान् एतासां।

नारायणः— एवं भवतु। अप्सरसः इहजन्मनि न विवाहो नो इति प्रतिज्ञा वर्त्तते। अतः स्वर्गं गच्छत नियमभङ्गाय अनुरोधमकृत्वा। अष्टाविंशतिद्वापरे देवकार्य्यार्थं अहं वासुदेवकृष्णरूपेण सम्भूय युस्माकं पतिः भविष्यामि एव। अतः कालान् सहस्व।

(अप्सरसां प्रणामः प्रस्थानं च)

(३य दृश्यम्)

(गन्धमादनपर्वतः। नरनारायणयोः व्युत्थानम्)

नारायणः— नर! त्वयात्र स्थातव्यं। अहं तु यत्रसायंगृहोमुनिः भूत्वा विचरिष्यामि पृथिव्यां वर्षाणि यावत्।

नरः — किं पुनः यत्रसायं गृहमुनिव्रतम्?

नारायणः— यत्र सायं पतति तत्रैव स्थातव्यं मुनिना रात्रौ स्वगृहं मत्वा। इत्येतद्व्रतम् मयाप्याचरणीयं।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

पश्चात्काले पुष्करे बारिपानात् तपः करिष्यामि सुचिरं। अन्ते सरस्वतीतीरमासाद्य द्वादशवार्षिकी-सत्रं बिधास्यामि उतरीयरहितः सन्।

नरः — ततः।

नारायणः— अनन्तरं प्रभासे शिवलिङ्गं संस्थाप्य महायज्ञं करिष्यामि त्वामाहूय। ततः पुनरागन्तव्यमत्र बिशालाभूमौ। परन्तु नह्यद्य गच्छामि। परमात्मनः साक्षात्करणानन्तरमेव। अधुना भूयः उर्द्ध्वबाहुः भूत्वा एकपदेन तिष्ठन् बायुभक्षणात् शरीरं कृशी कृत्य ब्रह्मस्वरूपेऽबस्थानं यावत् तपः साधयिष्यामि। बिश्वेश्वरस्य दर्शनं बिना न मे बिश्रान्तिः।

नरः — कोऽयं बिश्बेश्वरः यं भवान् पुराणपुरुषोऽपि द्रष्टुकामः।

नारायणः— "यं पश्यन्ति ब्राह्मणाः साधुचित्ताः
क्षीणेपापे मनसा बीतशोकाः
नालं द्रष्टुं यं जनाः भिन्नबृत्ताः
तमेबाहं बिश्वनाथं दिदृक्षुः।

नर! तमेकीभूतं तपसां सन्निधानं
दुर्बारणं दुर्दृशं तिग्ममन्युं
महात्मानं सर्बहरं हरमेबाहं द्रष्टुकामः तपामि।
स रुं दुखं दारयति। तस्मात् रुद्र इति कथ्यते

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

लोके । बस्तुतः तस्य न किञ्चिदभिधानं पुनः स एव सर्वाभिधानः

क्षितिं जलं खं दिशं चन्द्रसूर्यौ

तथाबाय्वग्नी जगच्च व्याप्य तिष्ठति एव । तमेवाहं बृहद्भ्यः अपि बृहत्तमं अणुभ्योऽपि अणीयासं द्रष्टुमिच्छामि तपसा चिरेण । (उक्त्वा योगमास्थाय सहसा समाधिमातिष्ठति । नरोऽपि तमनुकरोति । इत्यन्तरे पार्वत्या सह ईश्वरस्य भूतसंघाबृतस्य प्राकट्यं । नारायणस्य ध्यानभङ्गश्च ।)

नारायणः— (शिवालोकात् जानुभ्यां महीं गत्वा शिरसि अञ्जलिं कृत्वा स पद्माक्षः बिरूपाक्षं स्तौति बिस्मय-प्रसन्नतया)

" त्वत्सम्भूता भूतकृतो वरेण्य
गोप्तारोऽस्य भुवनस्यादिदेव
आबिश्येमां धरणीं येऽभिरक्षन्

पुरा पुराणीं तव देबसृष्टिम् । महाप्रभो । महासमुद्रे अद्भ्यः बिन्दवः यथा पृथक्त्वं गत्वा पुनः संक्षये तत्रैव निलीयन्ते तथैव जगतः प्रभवं चाप्ययं च त्वयि विदित्वा जनः तब सायुज्यमेति । प्रभो त्वं भुबनानां बिश्वानां प्रभबोऽसि । का कथा मामकानां । अतः कृपया मां भक्तं भजमानं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

भजस्व अहितानि निरस्य इति।"

श्रीभगवान्— नारायण! प्रसन्नोऽस्मि ते। मत्प्रसादान् नरासुर-देवयोनिषु त्वं अप्रमेयबलात्मा भविष्यसि। न केऽपि त्वां प्रसहिष्यन्ति समरेषु जेष्यन्ति च केनाप्युपायेन। न चाप्यहं। समरे त्वं ममाधिकोऽपि भविष्यसि। (भगवतः अन्तर्द्धानम्)

(४र्थ दृश्यम्)

(हिमालये पुष्पभद्रानदीतीरे मार्कण्डेयाश्रमे नरनारायणयोः प्रवेशः)

मार्कण्डेयः—(ताबालोक्य स्वगतं) शुक्लकृष्णौ कञ्जलोचनौ चर्मबल्कलाम्बरौ दण्ड-कमण्डलुधरौ पवित्रपाणी एतौ नरनारायणौ तडित्वर्ण्णरोचिषा साक्षात् तप एव मूर्त्तिमन्तौ। सुरपूजितौ इमे ऋषी मदनुग्रहाय एव अत्रोपस्थितौ। (उत्थाय प्राञ्जलिः आसनादिकं दत्वा) नमो नमः।

नारायणः— तपः सिद्धोऽसि। तव चिरकौमार्य्येन प्रीणितोऽहं मुने! मनोहर पुष्पभद्रानदीतीरे बसन्ताबेशे चन्द्रालोके अप्सरसां नृत्यगीतेषु मनोभवेन शरेषु प्रहितेषु पुञ्जिकस्थली नाम सुराङ्गनायां क्रीडा-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

रतायामपि यत् त्वं मनः समाधातुं शक्तोऽभूः तेनातीव विस्मितः सन् त्वद्दर्शनार्थं अत्रागत एव ।

मार्कण्डेयः—अच्युत ! मैवं कथनेन । त्वयैव उदीरिताः प्राणाः इन्द्रियाणि च स्पन्दन्ते जन्तूनां । हे अपवर्गमूर्ते । परितो भयानां प्राणीनां तवांघ्रिपूजनात् क्षेमान्तरं क्व विद्यते वा । द्विपरार्द्धायुः ब्रह्मापि कालरूपिणः त्वत्तः बिभीतः । किं पुनः मादृशानां भौतिकानां । भवदालोकनं सौभाग्यादेव इति मे मतिः । प्रभो !

मूर्त्तीं इमे भगवतो भगवन् त्रिलोक्याः
क्षेमाय तापविरमाय च मृत्युजित्यै
पादाश्रितं न गुणकालरुजः स्पृशन्ति
ध्यायन्ति बेदहृदया मुनयो यदाप्त्य ।

महापुरुष ! त्वमेव जगद् रक्षणाय कालेकाले नाना-तनूर्यथेदं धारयसि । सर्वं स्वयं सृष्ट्वा पुनः स्वतनौ उर्णनाभिरिव संहरसि । भगवन् ! पदे प्रणामात् तपसिद्धिं ददास्येव त्वम् । तुभ्यं नमोऽस्तु । नमोऽस्तु तुभ्यम् ।

नारायणः— ब्रह्मन् ! भद्रं ते भूयात् । बरदातुर्मे सत्वरं बरं प्रार्थय यदीप्सितम् ।

मार्कण्डेयः—भवद्दर्शनं सिद्धानामपि सुदुर्लभं । अतः एतावतैव वरःसंवृत्तो मे । पुण्यश्लोक ! तथापि त्वयाज्ञप्तः भवन्मायालोकनमेव बरं प्रार्थये ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

नारायणः— तथास्तु । सायं समागतं यातुमुत्सहे वदरीवनं ।
(अन्तर्द्धानं) (मायाविरचनम्)

मार्कण्डेयः—अन्तर्हिते भगवति मनसि क्षोभो जायते । एषा सन्ध्या आपतति पृथिव्यां । गच्छेयं तटिनीं सायं-कृत्यार्थं । परन्तु चक्रवालात् बलाहकाः कराला: समायान्ति । प्रभञ्जनोऽपि चण्ड शब्दायते । अहो अहो सहसा कथं चतुःसमुद्राणां बिश्वग्रासः ? क्व गन्तव्यं मे चतुर्दिक्षु जलमयेषु किमु प्रलयकालोऽय-मकस्मादागतः । अहो महोर्मयः प्रलयपयःसु अन्तरिक्षं व्याप्नुवन्ति । तिमिङ्गलानां विक्रमणं अन्तरं जडीकरोत्येव । कुत्राश्रयो मे क्षुत्पिपासा-र्दितस्य ? अदूरे वटवृक्षे दृश्यते । वटपत्रे शयानोऽपि दिव्यशिशुरेकः । बलादाकृष्टोऽहं शिशोरुदराभ्यन्तरं प्रति । (उदरे प्रवेशः) किमाश्चर्यं । कथमत्रापि पुण्यतोय पुष्पभद्रा मदा-श्रमश्च अक्षुन्नतया दृश्यते ? परितः हिमशृङ्गाण्यपि । किमैन्द्रजालिकोऽयं शिशुः । अस्योदरस्य बिस्ता-रस्यापि नान्तोऽस्ति । प्रलयार्णवस्यसर्वथा-भावोऽत्र । (सहसा बहिरागमनं शिशोःनिःश्वासेन) (बिस्मितः चिन्तयति) क्वास्ते वटवृक्षः शिशुः प्रलयसमुद्रो वा क्वचास्ते वा वारिधारा मेघमाला तिमितिमिङ्गलाः ? प्रकृतिमापन्नोऽस्मि । किमियं विष्णुमाया ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

नारायणः— (अन्तरिक्षे हसन्) बाढं विष्णुमायासीत्। किञ्चित् प्रदर्शितं बरानुरोधात्।

मार्कण्डेयः—(स्तम्भितः अन्तरिक्षं पश्यति। नारायणस्य तिरोधानं)

" नारायणाय ऋषये च नरोत्तमाय
हंसाय संयतगिरे नम ईश्वराय।"

—●—

(प्रुम्न दृश्यम्)

(गन्धमादनपर्वते 'नित्यतपस्विनोः नरनारायणयोः तपस्या। सहसा नारायणस्य हृदि शूलाघातः ध्यानभङ्गश्च)

नारायणः— (शूलंबीक्ष्य) रुद्रशूलोऽयं दक्षयज्ञध्वंसानन्तरं जगद्-ध्वंसाय प्रवृत्तः। अहो शिवशूलस्य दुःसहता। अतीव तेजसास्य सहसा केशाश्च मे मुञ्जवर्णाः संजाताः। अस्त्वेवं। इतः प्रभृति मां लोकाः मुञ्जकेश इति कथयिष्यन्ति स्मृत्यर्थं। परन्तु कथम-समये जगद्ध्वंसः। अतः प्रभोः कोपो निवारणीय बलेन। तेनैवापि मे बरोदत्तः समरेतदधिकत्वमिति। अद्य परीक्षणीयः। शूले प्रतिहते तद्दर्शनमपि सम्भवति भूयः।

(हुंकारेण निर्धूतः शूलः प्रत्यागतः शिवकरंप्रति)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

रुद्रः — (शूलं प्राप्य) केन प्रतिहतोऽयं शूलः ? अहो नारायणस्य हुंकार एव कारणमत्र। स च मां द्रष्टुकामोऽस्ति।

(रुद्रस्याक्रमणं। नारायणेन रुद्रकण्ठे हस्तेन चापः) रक्तस्तम्भात् कण्ठे नीलत्वं च

नरः — ईश्वरोऽपि हन्तव्यो मयाद्य मत्प्रभौ प्रहारात्। इमां इषीकां मन्त्रेण परशुं कृत्वा क्षिपामि।

(परशुनिक्षेपः रुद्रेण भङ्गस्तस्य)

नारायणः— नर ! निवृत्तो भव। परशोः खण्डनात् अद्य प्रभृति खण्डपरशुः इत्यभिधानं भविष्यति ईश्वरस्य। निरुक्तगः चतुर्मुखः सत्वरमागच्छति जगत्क्षोभनिवारणय ईश्वरकोपशान्तये च।

(ब्रह्मणः प्राकट्यं ऋषिभिः देवैः सह)

ब्रह्मा — (अञ्जलिंकृत्वा) विश्वेश्वर ईशान ! जगतां हितकाम्यया आयुधं उपसंहर। युवयोः युद्धेन लोकाः उद्विग्नाः जाताः। भाविताम्तनां ऋषीणां वेदा न प्रतिभान्ति। देवाः रजस्तमोगुणमाविशन्ति। वसुधा कम्पते नभोऽपि विचलितं। नक्षत्राणि निष्प्रभाणि भवन्ति। महासागरः शोषमुपैति। हिमवानपि विदीर्णो दृश्यते। अहमपि आसनात् चलितः। इमौ नरनारायणौ धर्मकुलोद्भवौ महाव्रतौ इदानीं महता तपसा युक्तावेव। इयं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

नारायणीमूर्त्तिरपि अविनाशिनः परमेश्वरस्य एका कल्याणी मूर्त्तिरेव येन पुरा कुतश्चित् कारणात् अहमपि सर्जितः । पूर्वसर्गे भवानपि अस्यैव क्रोधादुत्पन्नः सनातनपुरुषोऽसि । एनं प्रसादय कृपया ।

रुद्रः — ब्रह्मन् । एवमस्तु । नाहं क्रुद्धोऽस्मि तस्मै । स तु मद्वरस्य परीक्षणं चिकीर्षुरासीत् मां दिदृक्षुश्च । तस्मादीयं रीतिर्मे ।

नारायणः— प्रभो ! "यस्त्वां वेत्ति स मां वेत्ति यस्त्वामनु समामनु नावयोरन्तरं किञ्चिन्मातेऽभूद्बुद्धिरन्यथा ।" अद्यप्रभृति अयं शूलाङ्कः श्रीवत्स इति नाम्ना प्रख्याति मागमिष्यति । मत्पाण्यङ्कनात् भवानपि श्रीकण्ठ इति नाम धारयिष्यति ।

देवा — (प्रसन्नतया) हरिहरयोः जयोऽस्तु । हरिहरयोः जयोऽस्तु ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(षष्ठं दृश्यम्)

(नैमिषारण्ये गोमतीतीरे मृगयार्थं भ्रमति प्रह्लादः दैत्यराजः)

प्रह्लादः — अपूर्वेयं नैमिषबनशोभा । पुलस्त्येन मुनिना सत्यमेवोक्तं मह्यं यत् पृथिव्यां तीर्थेषु श्रेष्ठतमं नैमिषं । भगवतः नारायणस्य प्रियस्थलीयम् । (पुरोविलोक्य) नागाङ्कितवाणैर्बिद्धः शालवृक्षः । हेतुरस्यानुसन्धेयः । अहो जटाभारं बहतोः कृष्णाजिनधरयोः तपःसक्तयोः मुन्योः स्कन्धोपरि कथं वा धनुस्तूणीरौ ? नूनम् दम्भात् तपांसि अनयोः । तथापि जिज्ञासा कर्त्तव्या (पृच्छति समीपं गत्वा) मुनी ! कथं भवद्भ्यां धर्मविरोधः कृतः । जटाभारेण सह प्रवरायुधौ ?

नरः — मा ते चिन्तया । सामर्थ्ये सति यः यत् करोति तत्तस्य संपद्यते हि ।

प्रह्लादः — दैत्येश्वरे मयि धर्मसेतुप्रवर्त्तके राजति का शक्तिरिह युवयोर्वा ?

नरः — आवाभ्यां नरनारायणाभ्यां को वा निर्जितः न स्यात् समरे ?

प्रह्लादः — अवश्यं जेष्याम्यहं । (शरान् प्रेषयति । क्रमशः ब्रह्मास्त्रमपि)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

नरः — माहेश्वरास्त्रेण निवारणीयं सत्वरमिदं ब्रह्मास्त्रम् ।
(अजगवधनुषि शरसन्धानम्).

प्रह्लादः — ब्रह्मास्त्रमपि व्यर्थं जातं । गदया नाशयिष्यामि ।
(गदापाणिः रथात् स्यन्दते)

नारायणः— नर ! रणादपसर । मया योद्धव्योऽयमसुरः ।
(सहसा नारायणस्य शिरसि गदाप्रहारः प्रह्लादेन)

प्रह्लादः — (स्वं) कोयं शार्ङ्गधनुर्द्धरः ? गदाप्रहारेण अग्निकणा इव उष्णवारिबिन्दवः नयनयोः विकीरति ।

नारायणः— क्षणं तिष्ठ मत्पुरतः । समुचितंविधानं करोमि (शरक्षेपः)

प्रह्लादः — कठिनोऽप्यस्य बाणप्रहारः । ममायुधमपि खण्डितम् । अहो निर्जित एवाहमनेन ।
(प्रह्लादस्य मूर्च्छा)

नारायणः— गच्छ दैत्येन्द्र ! प्रात र्भूयो योत्स्यामः । इदानीं आह्निकमाचरणीयं । (सारथिना रथापसारणम्)

(७म दृश्यम्)

(वैकुण्ठे विष्णुसमीपे प्रह्लादः)

प्रह्लादः — (प्रणम्य प्रभो । वर्षाणि गतान्याहवे । जेतुं न शक्योऽहं एतावतापि नारायणमुनिं त्वया गुप्तोऽपि एकदा इन्द्रविजयो अपि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

विष्णुः — प्रह्लाद ! दुर्जयोऽसौ मुनिः सुरासुरैः त्वयापि ।

प्रह्लादः — यद्येवं तर्हि मत् प्रतिज्ञा अनृता जाता । देवेश ! हीनप्रतिज्ञतया कथं जीवेत मादृशो वीरः । भवत्-पुरतः एव कायशोधनं करिष्यामि ।

(स्नात्वा गायत्रीं स्मरति)

विष्णुः — दानवश्रेष्ठ ! अहमेव लोकानां हितकाम्यया धर्म-प्रवर्त्तनाय नारायणऋषिरूपेण तपश्चर्य्यां समास्थितः । तस्मात् जेतुकामश्चेत् तमाराधय । भक्त्यैव जितोऽस्ति धर्मपुत्रः नतु रणेन ।

(प्रह्लादस्य प्रत्यागमनं प्रणामान्ते)

प्रह्लादः — (स्व) एवं चेत् अन्धकासुराय राज्यं दत्वा बदरीबनं यास्यामि नारायणऋषिप्रसादनाय ।

(अन्धकं स्मरति)

अन्धकः — महाबाहो दैत्यराज ! किं मया करणीयं ?

प्रह्लादः — अन्धक ! राज्यधुरं स्कन्धे कृत्वा दैत्यान् चिरं पालय । कार्य्यार्थं यामि बदरिकाश्रम । न मे राज्येन प्रयोजनं भूयसा । (अन्धकस्य प्रत्यावर्त्तनं)

—★—

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(दम्भ दृश्यम्)

(दम्भोद्भवनृपतेः आत्मश्लाघा ब्राह्मणेभ्यः प्रश्नश्च)

दम्भोद्भवः—ब्राह्मणाः। अस्ति कश्चित् शस्त्रभृत् वैश्यः शूद्रः क्षत्रियो ब्राह्मणो युधि मद्विधः विशिष्टो वा ?

ब्राह्मणाः—वयं ब्राह्मणाः सर्वथा निर्भयाः, अकृपणाः, अस्मत्-पुरतः इत्थं आत्मश्लाघा न करणीया। श्रिया मत्तः अतिमानो बिभासि ईश्वरो दर्पं असहमान एव।

दम्भोद्भवः—ब्राह्मणा! न कश्चित् मत्समो मदधिको वा युद्धे विक्रमशाली वर्त्तते पृथिव्यां इति मे मतिः। अस्ति चेत् ब्रुहि तदभिधानं।

ब्राह्मणा—निषिध्यमानोऽपि मुहुः अशान्तिं ब्रिदधासि। तर्हि शृणु। संख्ये अनेकजयिनौ पुरुषसत्तमौ स्त यत-समो कदाचन न भबितासि त्वम्।

दम्भोद्भवः—कौ तौ बीरौ ? क्व जन्मानौ किं कर्माणौ वा ? क्व च आसते इदानीम् ?

ब्राह्मणा—राजन्! नरनारायणौ तापसौ तौ। अधुना मानुषे-लोके गन्धमादनपर्वते महत्तप समास्थितौ इति श्रुयते।

दम्भोद्भवः—एवं चेत् तत्र षडङ्गिनीं सेनां नीत्वा पश्यामि तौ कथमपराजितौ। (प्रस्थानम्)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(६म दृश्यम्)

(गन्धमादनपर्वते नरनारायण समीपे दम्भोद्भवस्य प्रवेशः)

दम्भोद्भवः— प्रतारितोऽहं ब्राह्मणैः । एतौ क्षुत्पिपासार्द्धितौ धमनिसंततौ शीतवातातपकर्षितौ तपस्विनौ युद्धे कथं मत्समौ भवितुमर्हतः । दण्डकमण्डलुसहायौ कौपीनवन्तौ कृशाङ्गौ किं कुर्वतो मां समरे । अस्तु तावत् पृच्छामि पार्श्वं गत्वा । ऋषिसत्तमौ । भवत्पादयोः मे प्रणामेः । (प्रमणति) अपि वर्द्धेथे तपसि अनामयं ।

नरः — कुशलं ते भूयात् राजन् । किं वा करणीयमावयोस्ते ? अत्र विषमस्थलं किमर्थमागतोऽसि ससैन्यः ।

दम्भोद्भवः— महर्षे ! ब्राह्मणैरुक्तं यत् युवामेव समरे अपराजितौ अतः मत्समौ मदधिकौ वा । मया बाहुभ्यां भूमिर्जिता शत्रवश्च निहताः प्राक् । भवद्भ्यां युद्धमाकाङ्क्षमाणो उपागतोऽत्र पर्वतं । एतन् मे चिराकाङ्क्षितमातिथ्यं दीयताम् ।

नरः — (बिहस्य) राजसत्तम अयमाश्रमो अपेतक्रोधलोभः एव । अत्र न शस्त्राणि न कुटिलतापि । युद्धस्य सर्वथा निषेधोऽत्र । क्षितौ क्षत्रियाः वहवः सन्ति । तानुपेहि युद्धाय ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दम्भोद्भवः— ऋषिसत्तमौ युद्धार्थमाहूयेऽहं । युवामपराजितौ देवैरपीत्युक्तं ब्राह्मणैः । युद्धमिच्छामि युवाभ्यां ।

नरः — (क्रुद्धः ईषीकानां मुष्टिं गृहीत्वा) युद्धकामुक क्षत्रिय ! एहि युध्यस्व । सर्वशस्त्राणि आदस्व वाहिनीं च योजयस्व बर्मणासन्नद्धो भूत्वा प्रस्तुतो भव सर्वथा । युद्धश्रद्धां ते क्षणात् व्यपनयामि ।

दम्भोद्भवः— मुने ! युद्धार्थमेवात्रागमनं मे । तस्मात् सदा प्रस्तुतोऽहं युद्धाय । किमेतदेव ते अस्त्रम् पर्य्याप्तं मन्यसे ?

(वाणप्रहारः सर्वेषां युगपत् नरस्योपरि)

नरः — दुर्बुद्धे ! सहस्व मे ऐषिकास्त्रं अप्रतिसन्धेयं ।

दम्भोद्भवः— (विपर्य्यस्तः) अहो पराक्रमो नरस्य । कुशमुष्टिना विशाला मे वाहिनी मयापि सह निर्जितानेन । अक्षीणि कर्ण्णनासिकाश्च नः भिन्नाः सर्वेषां निमित्तवेधिना मुनिना । इदमाकाशमपि ईषीकाभिः समाचितं सत् श्वेतं दृश्यते । शरणं गत्वा क्षमापयिष्यामि मुनिं । (पदयोः प्रणम्य) भगवन् ! मा क्रोधेन स्वस्ति भवतु मे तव कृपया ।

नरः — राजन् ! एवं पुनः मा कृथाः । इतः प्रभृति धर्मात्मा ब्रह्मण्यश्च भव । न कोऽपि यथार्थवीरः इत्थं व्यवहरति यथा त्वं कृतवानधुना । दर्पमाविष्टः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

कचिदपि विशिष्टमल्पीयांसं वा नाकारणमाह्वय-
स्व युद्धाय सहसा । निरहंकार आत्मवान्
वीतलोभश्च भूयाः । पार्थिव । दान्तः क्षान्तः
सौम्यःसन् प्रजाः पालय । बलाबलमविदित्वा यं
कंचिदपि मा क्षिपेः । आवाभ्यामनुज्ञातः कुशलं
गच्छ भूयः मैवं समाचरेः । अस्मदाज्ञया ब्राह्मणान्
कुशलं पृच्छेः विनयेन सर्वदा येन क्षेमं ते स्यात्
चिराय ।

दम्भोद्भवः— ब्रह्मन् ! नाहं भूयः दर्पं करिष्यामि । (प्रणम्य-
प्रत्यागच्छति ।) अद्भुतकर्मा अयं नरऋषिः । कुश-
मुष्टिकया जितबानेव सर्वान् । ततोधिकोऽपि
नारायण ऋषिः इति ब्राह्मणैरुक्तम् । इत्यन्तरेऽपि
एतावतापि निष्कम्पो तिष्ठति स्म । महानेबास्य
धैर्य्यः । नमो नरनारायणाभ्यां मुनिभ्याम् ।

— ★ —

(१०म दृश्यम्)

(बदरिकाश्रमे प्रह्लादस्य प्रवेशः । तपस्यारतौ नरनारायणौ)

प्रह्लादः — मनोहरौ तावदेतौ गौरश्यामतनू नरनारायणौ ।
नूनं बिष्णुरूपाभ्यां आभ्यां मदो मे नाशितः
कृपया । (प्रणमति पदे)

नारायणः— (विहस्य) असुरेश्वर ! मामजित्वा किमर्थं प्रणमसीह ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

प्रह्लादः — प्रभो ! साक्षात्शार्ङ्गधरं त्वां जेतुं कः शक्तोऽस्ति जगत्यां। त्वमेबासौ शाश्वतः पुरुषोत्तमः यं मनीषिणः योगिनश्चार्च्चयन्ति । त्वमेव अवतारान्तराणि गृहीत्वा महासुराणां नाशं कृतवान् साधूनाँ रक्षणाय। अविनाशिन् ! युद्धे नाहं जेतुं शक्नुयां त्वां। अतः प्रणमामि। क्षमस्व माम् ।

नारायणः— परितुष्टोऽस्मि बिनयेन । भक्त्यावश्यं अहमधुना पराजितोऽस्मि त्वया । अतः पराजयात् दण्डार्थं वरं दास्यामि ते। यदिच्छसि तत् प्रार्थय।

प्रह्लादः — नारायण ! यदि बरो देयः तर्हि त्वया युध्यमानस्य मे पापानि लयं यान्तु।

नारायणः— एवं भबिष्यति। भूयः प्रार्थय किमपि।

प्रह्लादः — प्रभो ! त्वत्प्रसादात् सर्वं मया लब्धं। न मे भूयः प्रार्थितव्यं किञ्चदप्यस्ति। तथापि त्वदाश्रितोऽहं इति ख्यातिरस्तुमे धर्मे त्वत्पूजायां च चिरं मतिः जायतु।

नारायणः— एवमप्यस्तु। मत्प्रसादात् अजरोऽमरश्च भविष्यसि। इदानीं स्वमाबासं गत्वा राज्यं पालय। न ते कर्मबन्धःस्यात् कदापि ।

प्रह्लादः — देब ! दत्तराज्यं पुनः कथं समादास्येऽहं ?

नारायणः— तर्हि तत्राबस्थाय दैत्यदानबनां हितोपदेष्टा भव।

(प्रह्लादस्य प्रस्थानं प्रणामानन्तरम्)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(११श दृश्यम्)

(ब्रह्मलोके ब्रह्माणमन्तरीकृत्य ऋषयः देवाः आसीनाः नरनारायणयोः तडित्वेगेन गमनं)

बृहस्पतिः— पितामह ! काविमौ क्रममाणौ जटाशोभिनौ पुरुषौ ? ओजसा अस्मत्तेजश्चाप्याददानौ इव। भवन्तमपि अनादृत्य तडित्वेगेन लोकमिमं अतिक्रान्तवन्तौ ?

ब्रह्मा — बृहस्पते ! यावेतौ पृथिवीं दिवं च भासयन्तौ अस्मान् अतिक्रान्तौ तौ महाबलौ नरनारायणौ तपस्विनौ एव। पराक्रमेण तपसा उर्जितौ एतौ भूलोकात् ब्रह्मलोकमपि समागतौ कार्य्याय। सत्कर्मणा लोकानन्दकरौ इमौ महात्मानौ एकत्वेऽपि असुराणां विनाशाय द्विधाभूतौ तिष्ठतः।

देवाः — एवं चेत् उपस्थिते देवासुर संग्रामे इमौ प्रसादयित्वा ताभ्यां सहायाः वयमवश्यमसुरान् जेष्यामः।

ब्रह्मा — अवश्यं विजयो वः स्यात् नरनारायणौ सहायकौ चेत्। तूर्णं गत्वा वरः प्रार्थितव्यः।

देवाः — बृहस्पतिपुरोगमाः वयं सत्वरं गमिष्यामः देवेन्द्रेण सह।

ब्रह्मा — यत्नः क्रियताम्। मा विलम्बेन।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

देवा — (प्रणामात्) कृपया रक्षणीया वयं भवद्भ्या असुराणामुपद्रवात् ।

नरनारायणौ— देवाः यदिच्छसि तत्करिष्यावः ।
शक्राय विजयो दातव्य एव ।

(१२श दृश्यम्)

(वदर्य्यां नरनारायणयोः समीपे नारदस्य प्रवेशः)

इयं हि बदरीभूमिः नरनारायणयोः तपसा निलपूता अतः महती तीर्थस्थली चिराय ।

नारदः — अहो ! भूतयुक्ते अष्टचक्रे कनकमयशकटे उपविश्य अमू प्राक्तन ऋषी आह्निकार्थं व्रजतः अलकानन्दातीरं । परंधामस्वरूपयोः का वाह्निकक्रिया ? सर्वभूतानां पितरौ दैवतं च कां देवतां पितृन् वा यजतः तदेव प्रेक्षणीयं मे दूरात् ।

नारायणः— नर ! दैवपितृकार्यं समाप्य शास्त्रविधिना नारदऋषिरर्च्चनीयः । (आह्निकं कुरुतः) ॐ तद् विष्णोः परमंपदं सदा पश्यन्ति सूरयः दिविव चक्षुराततम । नमो देवताभ्यः पितृभ्यश्च । नमो महायोगिभ्यः । (इति) देवर्षे ! स्वागतं ते । अत्रागत्य पाद्यासनादिकं गृहाण ।

नारदः — (विस्मयात्) गृणमति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

नारायणः— जानेऽहं ते कुतूहलं । अवाच्यामपि मीमांसां वक्ष्यामि भक्ताय तुभ्यं । सदसदात्मकः परमात्मा एवं योनिरावयोः । तस्मात् स एव नौ पिता देवता च । दैवं पित्र्यं च कर्म कर्त्तव्यं । तस्यैव परमात्मनः अनुशासनात् इयं लोकभाविनी मर्यादा यामनुवर्त्तन्ते मरीच्यादयः एकविंशतिप्रजापतयः । मर्त्यस्थाः स्वर्गस्था अपि देहिनः मुक्तात्मानश्चतमेव परात्मानं कर्मणाभ्यर्च्य ज्ञानेन पश्यन्ति विशन्ति च । धर्मात्मन् । श्वेतद्वीपे अव्ययपुरुषमालोक्यागतोऽसि त्वम् । नहि किम ?

नारदः — वाढम् दृष्टः सोऽव्ययः सर्वेषामाश्रयः । प्रभो त्वय्यपि तमेवानुपश्यामि । त्वामपि तत्र दृष्टवानहं । भवानपि तल्लक्षणैरुपेतऽस्तीति अधुना पश्यामि ।

नारायणः— धन्योऽसि त्वं दुर्द्दर्शस्य प्रभोः दर्शनात् ।

नारदः — भगवन् । दैवकर्म परोयज्ञः तस्मात् कर्त्तव्यमित्युक्तं प्राक् त्वया । परन्तु पितृकार्ये पूर्वं कुशान् दत्वा कथं पिण्डत्रयं न्यस्यन्तीति ?

नारायणः— पूर्वं भगवता वराहेण पृथिवीमुद्धृत्य मध्याकाशे रवौ आह्निककाले प्राप्ते सति कुशनास्तीर्य्य दन्तलग्नया मृत्तिकया पिण्डत्रयं कृत्वा स्वदेहतापजैः स्नेहगर्भैः तिलैः अपसव्यं प्रातँमुखं प्रोक्ष्य पितृकार्ये मर्यादा स्थापिता इति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

"एषा तस्य स्थितिर्विप्र पितरः पिण्डसंज्ञिताः
लभन्ते सततं पूजां वृषाकपिवचो यथा" नारद ।
"पितृपितामह प्रपितामहरूपेण
स भगवानबाने त्रिषु पिण्डेषु संस्थितः" । कि बहुना
"समः सर्वषु भूतेषु इश्वरः सुखदुःखयोः
महान् परत्मा सर्वात्मा नारायण इति श्रुतिः । इति
ब्रह्मन्
भागबततत्वं यथादृष्टं यथाश्रुतं मत्प्रेरणादेव
मदङ्गजं द्वैपायनं आख्याहि काले येन स
भागबतस्य रचयिता भविष्यति ।

नारदः — महात्मन् ! पाराशर्यः कथं नारायणांशजः स्यात् ?

नारायणः— नारद ! सप्तमे सर्गे भगबतः श्रीहरेः उच्चारणात्
यस्य जन्म अभूत् स हि पुत्रः अपान्तरतमा इति
नाम दधार । स्वायम्भुवे मन्वन्तरे वेदस्य भागं
स एव कृतवान् । पुनरपि प्रभोराज्ञया वशिष्ठपौत्रात्
कन्यकायां कानीनगर्भरूपेण जातः स एव कृष्णः
बेदविभागात् व्यास इति ख्यातिं यास्यति । शीघ्रमावां
कृष्णार्जुनरूपेण महीं गच्छावः । पश्चात् तं त्वं
प्रेरयितुमर्हसि मत्कथित-भागबत तत्व प्रचाराय ।
महर्षे प्रयोजने संति भूय आगन्तव्यं । अत्र बदरी-
वने एव मे नित्यनिबासः ।

(नरनारायणयोः अन्तर्द्धानम्)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

त्रिमुनिस्मरणम्

संवित्प्रकाशाः गतिरुद्ध्र भूमौ अत्यन्तमूढस्य नराधमस्य
यत्शक्तिपातादपि सम्भवन्ति दयार्णवं तं गुरुमानतोऽस्मि ।

प्रस्तावना — (संस्कृतविद्यालये व्याकरणश्रेण्यां आसने आसीनं अध्यापकं प्रणम्य छात्राः उपविशन्ति)

अध्यापकः—आगच्छन्ती श्वः पाठनाशिनी प्रतिपत् । अतोऽनध्यायः तस्मात् अद्य चैत्रपूर्णिमायां पर्वदिनेपि व्याकरणस्य मङ्गलारम्भं केवलं करिष्यामः पूर्वपठितस्य शास्त्रान्तरस्य चर्वित-चर्वणमकृत्वा ।

छात्राः — (अनध्यापनसूचनया आनन्देन) एवमस्तु । एवमस्तु ।

अध्यापकः— "येनाक्षरसमाम्मायमधिगम्य महेश्वरात्
कृस्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः
येन धौतागिरः पुंसांबिमलैः शब्दबारिभिः
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः
वाक्यकारं बररुचिं भाष्यकारं पतञ्जलिं
पाणिनिं सूत्रकारं च मुनित्रयं नमाम्यहम् ।"

१म छात्रः— अनेकानां व्याकरणाचार्य्याणां ऐन्द्रादिबहुषु व्याकरणेषु श्रुतेषु कथं मुनित्रयाय केबलं प्रणतिः ?

२य छात्रः— महेश्वरात् कथमवाप्तो वा अक्षरसमाम्नायः महामुनिना पाणिनिना येन कृत्स्नं व्याकरणं प्रोक्तं तेन नतु कृतम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

३य छात्रः— भगवता पाणिनिना माहेश्वरीये व्याकरणे कृते सति बररुचेः तत्र उक्तानुक्तदुरुक्तानां विचारेण किं प्रयोजनं वासीत् ।

४र्थः — पाणिनिवररुच्योः कृतावपि सूत्रार्थनिर्द्धारणे कथं वा पतञ्जलेः भाष्यरचनायाः प्रयोजनमनुभूतम् ।

अध्यापकः—साधुपृष्टं युष्माभिः । सर्वेषामेव एतेषां प्रश्नानां यूयं प्रत्यक्षं लप्स्यन्ते सायमत्र टि. भि. तिरस्करिण्यां श्रीनारायणरथाख्येनार्वाचीनकविना सुरभारत्या रचितायां "त्रिमुनिस्मरणम्" इत्यभिधायां नाटिकायां प्रदर्शितायां सत्याम् । अतः सर्वैः प्रदोषे वेदभवनमेवागन्तव्यं तद्दर्शनार्थं मत् समक्षम् ।

छात्राः — एवं एवं । यथाज्ञापयन्ति गुरवः ।

(प्रणामान्ते निष्क्रान्ताः)

(१म्नाङ्कः - १म्नट्टश्यम्)

(क्षीराब्धौ हरेरनन्तशयनम्)

अनन्तः — कथमकस्मात् दुःसहं भगवतः गुरुत्वं ? मायाधरस्य मायया बिमोहितोऽहं किमु ? नोचेत् कस्मादीदृशो भारबोधः । तस्यैव शक्त्या नित्यं भारस्य-बोढाहमस्मि ।

(भगवतः चक्षुरुन्मीलनं । शेषस्य बिस्मयं ज्ञात्वा)

विष्णुः — ताण्डवं द्रष्टुकामस्य मे कैलासे नटराजस्य नृत्य-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

रसास्वादनमभूदेवेदानीं । ध्याने मम ताण्डवदर्शन-बिह्वलत्वादेव त्वयि भारबोधः । मनोरम एव शिवताण्डवः ।

अनन्तः — (स्वं) त्रिलोचनस्य ताण्डवदर्शनेन महानेवानन्दः-स्यान् ममापि । परन्त्वत्र प्रभुसेवायां वर्त्तमानत्वात् ।

विष्णुः — (स्वं) अनन्तस्यापि शिवताण्डवदिदृक्षा । अनेन कार्य्यं किमपि सम्भवत्येव ईश्वरस्य । (प्रकाशं) ताण्डवं दिदृक्षुश्चेत् प्रयाहि भूलोकं । तत्र जम्बु-द्वीपे भारतवर्षे चिदम्बराक्षं प्रसिद्धं शिवक्षेत्रं वर्त्तते यत्र ईशानः नटराजरूपेण संपूजितः । तत्रैव शूलपाणेः ताण्डवस्य द्रष्टासि तदनुग्रहात् । अनन्तरं स एव बिभुः त्वामपि लुप्तप्रायस्य पाणिनीय-व्याकरणस्य भाष्यकरणाय नियोजयि-ष्यति । (बिष्णोरन्तर्द्धानम्)

अनन्तः — अहो प्रभुणा बिरहो भविष्यत्येव अनया ताण्डब-दिदृक्षया परन्तु पाणिनीयव्याकरणस्य भाष्य-निर्माणे कथं वा शिवाग्रहः ?

(नारदस्य प्रवेशः प्रणामश्च)

नारदः — अशेषे जगति निःशेषं गतेऽपि शेषीभूतस्य शेषदेवस्य किमज्ञातं वा ? तथापि कथयामि प्रभोः मनोबिनोदनाय ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(२य दृश्यम्)

(वर्षाचार्य्यस्य पाठशालायां छात्राः सावधानं पठन्ति)

आचार्य्यः— पाणिने ! पुरो वर्त्तस्व । जानामि ते पितरं देवलपुत्रं शालातुरग्रामवासिनं पण्डिताग्रणीं पणिम् तत् पत्नीं दाक्षींच दक्षपुत्रीं महाभागाम् दाक्षायणभगिनीं । तदुत्पन्नत्वात् त्वय्यपि पाठे दक्षता व्यवहारे शालिनता भवितुमर्हत्येव ।

पाणिनिः— (पुरआगत्य प्रणमति ।)

कात्यायनः— (निम्नस्वरेण) शालावृके शालातुरीये का वा दक्षता ।

आचार्य्यः— बररुचे ! श्रुतं त्वदुक्तं । मैवमभ्यसूयया । त्वमपि दाक्षिणात्यादागतोऽसि । अयं पाणिनिः मदाशिषेन समये महेशप्रसादं प्राप्स्यति येन महत्कार्य्यसम्पाद्य समुद्रान्तपृथिव्यां ख्यातिं यास्यति चिराय । प्रखरबुद्धिमानपि त्वं द्विषन्नपि तं तदनुसरणादेव प्रसिद्धिं गमिष्यसि ।

कात्यायनः— (भयेन) नाभ्यसूयामि तं । कौतुकेन जल्पितं मे ।

आचार्य्यः— कैतवेन मा । "अतीत्य हि गुणान् सर्वान् स्वभावो मूर्ध्नि वर्त्तते ।

कात्यायनः— अलं लज्जितोऽहं । क्षन्तव्योऽस्मि । (निष्क्रान्तः)

पाणिनिः— कात्यायनस्य व्यवहारः सोढुं न शक्यते मयानुदिनं

CC-0. Panini Kanya Maha Vidyalaya Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

महानेव दर्पस्तस्य बुद्धिमत्त्वात् । गुरुणोक्तं महेशस्य करुणा लभ्या मया । अत इतो गत्वा जम्बुद्वीपस्य तीर्थसकलं विलोक्यान्ते कांचित् पुण्यभूमिमासाद्य तपसा यतिष्ये महेश्वरस्य प्रसादाप्त्यै ।

(३य दृश्यम्)

(प्रयागे अक्षयवटमूले समाधिस्थाः सनकाद्या ऋषयः । पाणिनस्य प्रवेशः । जलराशिं निरीक्ष्य)

पाणिनिः —परिक्रान्तं निखिलं भारतवर्षम् । अहो भाषा-वैचित्र्यं लोकानाम् । एक एव शब्द उच्चारण-पार्थक्यात् भिन्नः प्रतिभाति । व्यवहारोऽपि जनानां देशे देशे भिन्नतामाबहत्येव । विशालेयं जन्मधरणी कथमपि एकेनैव भाषासूत्रेण ग्रथिता स्याच्चेत् कार्त्स्न्येन महद्धितं सम्भवेत् । किं प्रलापेन ? (सहसा वटमूले मुनीन्वीक्ष्य) अहो महामुनयोऽपि तपसि निरता अत्र केनापि हेतुना । एतेषां दर्शनमेव कार्य्यसिद्धये । तस्मात् पश्चादा-स्थितः सन् आशुतोषे मनो निवेशयिष्यामि एव ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(तथा करोति । समये हरस्याविर्भावः नृत्यारम्भश्च नवपञ्चवारं डमरुवादनं च । ध्यानभङ्गादाकर्ण्ण-यन्ति मुनयः । हरस्यान्तर्द्धानं सहसा)

पाणिनिः — प्रणामाः सन्तु मुनिभ्यः ।

मुनयः — आप्तकामो भव । महाभाग्यवानसि त्वं दाक्षीपुत्र । अष्टविंशदिवसेऽपि तपसा पर्ण्णजलवायुसेवनात् ईश्वरं दृष्टवान् असि । श्रुतं किमु माहेश्वरडम्वरु-वादनम् ?

पाणिनिः— अइउण् । ऋऽक् । एउउँ । ऐऔङ् । हयवरट् । लण् । घढधष् । जबगडदश् । खपंछठथचटतव् । कपय् । शषसर् हल् इत्याकारेण एव ध्वनयः श्रुता मया ।

सनकः — अहो अक्षरसमाम्नाय एव निरूपितः महेश्वरेण । कृतार्थो भवानेन सूत्रजालेन । सूत्रेभ्यः प्रत्या-हारान् विधाय व्याकरणशास्त्रस्य रचनां कुरु लोकहिताय चिराय च यशो लभस्व "रक्षार्थंवेदा-नामध्येयं व्याकरणं । लोपागमवर्ण्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति ।" ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयः ज्ञेयश्च । प्रधानं च षडङ्गेषु व्याकरणम् ।

पाणिनिः— अत्र तु केचिद् वदन्ति— अनर्थकं व्याकरणम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

यतः वेदात् वैदिकाः शब्दाः सिद्धाः लोकाच्च लौकिकाः ।

सनकः — न च सर्वैः लिङ्गैः न च सर्वाभिः विभक्तिभिः वेदे अर्थाः निगदिताः । ते चावश्यं यज्ञगतेन यथा-यथं विपरिणमयितव्याः । अतः ब्राह्मणेन अवश्यं शब्दाः ज्ञेयाः । परन्तु न चान्तरेण व्याकरणं लघुनो-पायेन शब्दाः शक्याः ज्ञातुम् । असन्देहार्थं चाध्येयं व्याकरणं । दुष्टः शब्दः स्वरतो वर्ण्णतो वा मिथ्या-प्रयुक्तो नतमर्थमाह । अशुद्धशब्दः यज्ञे व्यवहृतश्चेत् वज्र इव यजमानं हिनस्ति यथेन्द्र शत्रुः स्वरतोऽप-राधात् ।

पाणिनिः —एकैकस्य शब्दस्य बहवोऽपभ्रंशाः ।

सनकः — परन्तु अविकृतवाणीप्रयोगकारिणः जिह्वायां मङ्गलमयी लक्ष्मीः वसत्येव । अपितु आहिताग्नि-रपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीं इष्टिं निर्वपेत् । सप्तविभक्तीनां सुष्ठुप्रयोगात् लोको वरुण इव सत्यदेवो भवति ।

पाणिनिः— यथाज्ञापयन्ति मुनयः ।

(प्रणमति । मुनीनामन्तर्द्धानम्)

—★—

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(४र्थ दृश्यम्)

(गङ्गातटे पाणिनिः चिन्तामग्नः । अदूरे शिष्यकौत्सः उपविष्टश्च)

पाणिनिः — कौत्स । किं करणीयमत्र ? कथं वेदमन्त्राणां सुरक्षा स्यात् असदुच्चारणकुव्याख्याक्षेपेभ्यः ? शब्दानामनुशासनमव्यश्यं विधेयं लोके वेदे च भिन्न-प्रयोगदर्शनात् एकस्यैव शब्दस्य । प्राकृताः बलवत्तरा भवन्त्यनुदिनम् । उदीच्यां भाषा प्रज्ञाततरा मन्यते बुधैः । मागधमालवादिप्रान्तेषु इन्द्रापि-शलिगार्ग्यशाकटायनादीनां व्याकरणं बहुधा भिन्नमपि प्रचलितम् ।

कौत्सः — परन्तु सर्वेषां समन्वयेन व्याकरणशास्त्रं विरचय्य समग्रेऽपि देशे संस्कृतभाषाया एकरूपता विहिता एव भवता ।

पाणिनिः —मया तु माहेश्वरसूत्रेभ्यः प्रत्याहारान् विधाय टि.घु. नदी, निष्ठादि संज्ञाः संकल्प्य पूर्वाचार्य्यपद्धत्या एव व्याकरणं रचितम् । सर्वेषां स्वीकृतार्थेन तत्तदा-चार्य्याणां नामानि सूत्रेषु दत्त्वा सन्धिकार्य्यादिषु विकल्पपक्षं अपि प्रदत्तं पदस्य । सर्वनामाव्ययधातु प्रातिपदिकादिलोकप्रसिद्धाः पूर्वाचार्य्याणां संज्ञाः अपरिवर्त्तिता एव विद्यन्ते । (व्याडेःप्रवेशः)

व्याडिः — तर्हि पाणिनिना प्रोक्तं नतु कृतं व्याकरणं इति जना वदिष्यन्ति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

पाणिनिः —किं तर्हि। शब्दानुशासनं विधाय संस्कृतभाषाया एकरूपतानयनमेव मे लक्ष्यम् । शब्दार्थयोः नित्यसम्बन्धत्वात् तदेव संसाध्यं व्याकरणस्य । प्राचीनानां पारिभाषिकशब्दाः तथैव तस्माद् व्यवहृता मया विरोधपरिहाराय । वैदिकभाषा देववाणी एव। तस्याः शुद्धता सर्वथा रक्षणीया। तथापि वेदोक्तानां लोकप्रचलितानामपि शब्दानां अनुशीलनेन "व्यतिक्रमे छन्दसि" इत्यादिना विकल्पः दर्शितः ।

कौत्सः — किमज्ञातं गुरुपादानां वा ? आगान्धारात् वंगाङ्ग कलिङ्गपर्य्यन्तजनपदेषु प्रचलिताचारव्यवहार-परिच्छदग्रन्थभाषादीनां ज्ञानं तत्रभवतः वर्त्तते एव। अतः जनाः वदन्ति यत् पाणिनीयं व्याकरणं मौलिकत्वेऽपि बाङ्मयसंस्कृतेरितिहासमेव येन भारतवर्षस्य आत्मनः साक्षात्कारः भवत्येव अनुशीलनवताम् ।

व्याडिः — एवं एवं । अस्य संहितात्वं स्वीकृतमेवास्माभिः प्राचीनैरपि। "सामर्थ्ययोगान्नहि किञ्चदत्र पश्यामि शास्त्रे यदनर्थकं स्यात् ।"

(सहसा वनप्रान्ते हरिध्वनिः)

(तथापि चिन्ताशीलः पाणिनिः)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

कौत्सः — व्याघ्रः । व्याघ्रः । (व्याडिकौत्सयोः पलायनम्)

पाणिनिः— विशेषेन आजिघ्रतीति व्याघ्रः । अत्र भयस्य क्व हेतुः ?
"शब्दब्रह्मणि निष्णातः परंब्रह्माधिगच्छति ।"
(पाणिनस्य ब्रह्मचिन्तनं व्याघ्रस्य आक्रमणं च)

(प्रश्न दृश्यम्)

(तक्षशिलायां पाणिनिपाठशालायां शिष्याः पठन्ति ।)

१म शिष्यः—अद्भुतमिदं पाणिनीयमष्टाध्यायी व्याकरणम् ।

२य शिष्यः—असाधारणी एवास्मद्गुरोः प्रतिभा । अन्यथा कथं अक्षरसमाम्नायमात्रं महेश्वरादधिगम्य प्रकाण्डं व्याकरणशास्त्रं कृतमनेन द्विचत्वारिंशत्प्रत्याहारान् विधाय ?

३य शिष्यः—परन्तु तद् व्याख्यानं यथार्थतया कर्तुं पाणिनिकात्यायनौ विहाय अर्वाचीनेषु कः समर्थोवा महीतले । (व्याडेः प्रवेशः)

व्याडिः — परन्त्वधुना उभौ तौ दिवं गतौ अन्योन्यशापात् । त्रयोदश्यां तिथौ ।

शिष्याः — विस्मिताः) कथमेतत् ? अहो महर्षयोऽपि ईर्ष्यया विदूषिताः का कथा परेषाम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

व्याडः — नोचितमित्थं भाषणम्। नियतिरेवासीदित्थम्। आदौ शास्त्रार्थे कात्यायनेन निर्जिते सति पाणिनौ आकाशस्थेन महेशेन हुंकारेणैव ऐन्द्रव्याकरणस्य नाशः कृतः। बिमूढीभूतः कात्यायनः हिरण्यगुप्तो नाम वैश्यात् न्यासेन धनमानीय परिवारभरणाय दत्वा हिमालये ईशानतुष्ट्यै दिनानि तप्तवान्। काले शङ्करप्रसादात् पाणिनीये प्रवेशं आप्नुय शिवस्य प्रेरणयैव पाणिनिव्याकरणेऽपि इतरैः-सम्भावनीयदोषानाशङ्क्य तत्प्रदर्शनेन पाणिनेरनुपूरणमेव कृतवान् कात्यायन नतु प्रत्युत बिरोधं यद् खल्पज्ञाः मन्यन्ते।

शिष्याः — ततः।

व्याडः — तथापि "बिनाशकाले बिपरीत बुद्धि" रितिबाक्यं सत्यमेव। क्रुद्धः पाणिनिः मत्पितृखसेयः "दिवं गतो भब" इति शशाप। कात्यायनोऽपि तमनुरूपं शशाप। अनन्तरं सिंहो व्याकरणस्य-कर्त्तुरहरत् प्राणान्प्रियान् पाणिनेः।" पश्यत उपस्थितौ शोकतप्तौ पिङ्गलप्रमुखौ पाणिनि-भ्रातरौ। (यथाकृत्यान्ते)

पिङ्गलः — तथापि "आकुमारं यशः पाणिनेः" मद् भ्रातुः।

प्रमुखः — भ्रातापि मे पाणिनिः "प्रमाणभूत आचार्यः"

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

एव। "दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तन्नशक्यं वर्णेनापि अनर्थकेन भवितुं किं पुनरियता सूत्रेण।"

पिङ्गलः — अकालकत्वमत्र केचन आरोपयन्ति। तदयुक्तं। दशविधलकाराणामुपयोगात्। यदि वा पूर्वव्याकरणानि अद्यतनादिकालसंज्ञायुक्तानि तद्रहितमपि पाणिनीयं विशुद्धं लकारविस्कारात्।

प्रमुखः — न केवलं पाणिनिः सूत्रकारः वैयाकरण आसीत् परन्तु महाकविरपि। यथा दृष्टः "जाम्बवतो विजयः" "पार्वतीपरिणयः" "पातालविजयः" इति काव्यत्रये। अद्भुता तत्र शब्दयोजना दृष्टा मया। शृणुतः —

गतेऽर्द्धरात्रौ परिमन्दमन्दं
गर्जन्ति यत्प्रावृषि कालमेघाः
विलोक्य नो वत्समिवेन्दुबिम्बं
तच्छर्वरी गौरिव हुं करोति।

पिङ्गलः — अन्यत्रापि—

"असौ गिरेः शीतलकन्दरस्थः
पारावतो मन्मथचाटुदक्षः
घर्मालसाङ्गीं मधुराणि कूजन्
संवीजते पक्षपुटेन कान्ताम्।"

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

प्रमुखः — तथैव—

"उपोढरागेण विलोल तारकं
तथा गृहीतं शशिना निशामुखम्
यथा समस्तं तिमिरांशुकंतया
पुरोऽपि रागाद् गलितं न लक्षितम्।"

तन्वङ्गीनां स्तनौ दृष्ट्वा शिरः कम्पयते युवा
तयोरन्तर संलग्नां दृष्टिमुत्पाटयन्निव।"

पिङ्गलः — तथैव—

"क्षपाः क्षामीकृत्य प्रसभमपहृत्याम्बुसरितां
प्रताप्योर्वीं कृत्स्नांतरुगहनमुत्शोष्य सकलम्
क्व संप्रत्युष्णांशुर्गत इति तदन्वेषणपरा
स्तडिद्दीपालोका दिशिदिशि
चरन्तीव जलदाः।"

व्याडिः — (रुदन्) तस्मादेव बदन्ति सन्तः—

"स्वस्ति पाणिनये तस्मै यस्य रुद्रप्रसादतः
आदौ व्याकरणं काव्यमनु जाम्बवती जयम्।"

प्रमुखः — बररुचिरपि कुशाग्रधीसम्पन्न आसीदेव। बाल्येऽपि उपनयनात् पूर्वं आचार्य्यव्याडेः मुखात् प्रतिशाख्यं निशम्य कण्ठस्थं अकरोत् इति श्रुतमस्माभिः।

व्याडिः — एवं एवं।

प्रमुखः — न केवलं तत्। एकदा नाट्याभिनयमालोक्य पश्चाद् गृहे मातुः समीपेऽपि आद्योपान्तमकथय-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दबिकलमेब सः । स तु रुद्रानुचरः पुष्पदन्तः पार्वत्याः कोपात् तु मनुष्ययोनौ संजात इति श्रुयते ।

व्याडिः — सकलं यथार्थं यत् त्वयोक्तं । सकृद्ग्राही स आसीदेब, जन्मकालेऽपि तस्य आकाशवाणी इत्थमभूत् —

"एकश्रुतिधरो जातो बिद्यां बर्षादबाप्स्यति
किञ्च व्याकरणं लोके प्रतिष्ठां प्रापयिष्यसि
नाम्ना बररुचिलो के यत्तदस्मै हि रोचते"

इत्यादिः

बरे श्रेष्ठबिषये केबलं तस्य रुचिरासीत् । तस्मादेब बररुचिरिति नाम अभूत् तस्य ।

प्रमुखः — परन्तु पाणिनिबिद्वेषे रुचिस्तु आसीदेव ।

व्याडः — नहि तस्य बिरोधः पाणिनिना सह शास्त्रबिषयं-हित्बान्यत्र । सोऽपि पाणिनिं महामतिमिति मन्यते स्म । तद्बार्त्तिकमपि पाणिनिसूत्राणां परिशिष्टत्बात् सामयिकभाषया सह सामञ्जस्यं बिधाय पाणिनीयप्रकाशमात्रम् । तस्मादेव बार्त्तिकादौ लिखितं तेन— "सिद्धे शब्दार्थसम्बन्धे । लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु । समानायामर्थगतौ

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

शब्देन चापशब्देन शब्देनैवार्थोऽभिधेय इति नियमः। तत्र ज्ञानपूर्वकप्रयोगे धर्मः। इत्यादयः।

पिङ्गलः — किं बहुना। मयापिश्रुतं महाराष्ट्रनिवासी सोमदत्तपुत्रोऽसौ कृतगोत्रीयत्वात् कात्यायानापरनामा बररुचिरपि न केवलं स्मृतिकारः वार्त्तिककारः परन्तु महाकबिरपि आसीदेब। तस्यैव 'स्वर्गारोहणं' काव्यप्रशंसया जना बदन्तीत्थं—

"यः स्वर्गारोहणं कृत्वा स्वर्गमानीतवान् भुवि
काव्येन रुचिरेणैव ख्यातो वररुचिः कबिः।"

प्रमुखः — आः किं व्यर्थजल्पितेन। महाशाक्तः नन्दराजमन्त्री स बररुचिरपि पाणिनिशापानन्तरं विन्ध्याटव्यां कथाप्रसंख्यानावसरे पिशाचैरभिभूतः त्रयोदश्यामेब दिवंगतोऽभूत्। पाणिनिकात्यायनयोः उभयोरभावात् पाणिनीयव्याकणार्थाः लोकैरगम्याभबिष्यन्तीव।

व्याडिः — स्वयं महेश्वरः स्वसूत्रनिर्मितव्याकरणस्य रक्षार्थं यत्नपरो भबिष्यत्येब। मा चिन्तया। त्रयोदश्यामेब तिथौ पाणिनिकात्यानयोः सूत्रबृत्तिकारयोः निधनात् इतः प्रभृति त्रयोदशी तिथिरपि बैयाकरणानां निखिलानां अनध्यायत्वं यास्यतीति।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

शिष्याः — "पाणिनिर्भगवानेव स्वयं चन्द्रार्द्धशेखरः
प्रतिष्ठापयते कोऽन्यो दिव्यं व्याकरणं भुवि ।"
"पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणं
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ।"

(दृष्ठ दृश्यम्)

(क्षीराब्धौ शेष-नारदौ)

नारदः — शेषदेव ! स्रष्टुः सृष्टविषये स्थितिचिकीर्षा भवत्येव । अतः भगवतः शङ्करस्य स्वकीयाक्षरसमाम्नाये महती प्रीतिः । अधुनापि प्राचीनाः चतुर्द्दशसूत्रैरेव महादेवस्य स्तवनं कुर्वन्ति । तस्मात् शिवस्याग्रहो भवेदेव भाष्यविषये । अतः—

"भोगीन्द्र तेषां भुवि वार्त्तिकाना
मशेषविद्वज्जनदुर्ग्रहाणाम्
भाष्यं महत् कुर्विति भक्तरक्षी
नियोक्षते त्वां किल नीलकण्ठः ।
तदा नियोगात् तरुणेन्टुमौलेः
धरातले त्वं विहिताबतारः
चिदम्बरक्षेत्रगतः पवित्रं
जगोत्सवं द्रक्ष्यसि कृत्तमैशम् ।"

CC-0. Jangamwadi Math Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

शेषः — तर्हि कथं अवतरेयम् ।

नारदः — मनुष्यशरीरग्रहणात् ।

शेषः — मातृत्वं का बार्हति सम्प्रति ।

नारदः — गोणिका नाम्नी तपस्विनी मुनिकन्या प्राज्ञपुत्र-लाभाय शिवाराधने कालात् लग्ना बसति भारत-बर्षस्य चिदम्बरक्षेत्रे काश्मीरप्रान्तस्थगोनर्द देशी-यापि । तत्र चिदम्बरतीर्थेऽपि शिवः नटराजरूपेण संपूजितः । सैब मातृत्वमर्हति देबस्य । उभयथापि कार्य्यसिद्धिः स्यात् ।

शेषः — बिष्णुनापि तथैव संसूचितम् । अस्त्वेबम् ।

—★—

(७म दृश्यम्)

(चिदम्बराकाशे चिन्तयति शेषदेबः)

शेषः — कथं ब्रजामि गोणिकायाः पुत्रत्वं । योनिजन्म न रोचते मह्यं दुःखप्रदत्वात् । एवं रूपेण वा का मां स्वीकरिष्यति पुत्रत्बे । इयं हि गोणिका ताम्रपात्र-हस्ता आगच्छति बहिरङ्गनम् ।

गोणिका— प्राङ्मुखी अञ्जली जलं गृहीत्वा—

ॐ एहि सूर्य्य सहस्रांशो तेजोराशे जगत्पते अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिबाकर ।

श्री सूर्य्याय एषोऽर्घ्यः स्वाहा ।

CC-0. Jangamwadi Math Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

ॐ नमः । शिवाय सूर्य्यरूपाय शिवरूपाय भानवे
उभयोरन्तरं नास्ति ह्यादित्यस्य शिवस्य च ।

(इत्यवसरे अञ्जलौ पतति शेषः क्षुद्रसर्परूपेण । गोणिका भयेन भूमौ निक्षिप्य)

गोणिका — को भवान् ?

शेषः — सर्पोहम् ।

गोणिका — रेफः क्व गतः ?

शेषः — त्वयापहृतः । (निशम्य हृष्टा हसति गोणिका । शेषोऽपि क्षुद्रशिशुरूपेण तत्पदे प्रणमति ।)

गोणिका— मम अञ्जलेः पतितोऽसि । तस्मात् पतञ्जलिर्नाम भवत्वेव ते । (पतञ्जलिं क्रोडे कृत्वा गृहाभ्यन्तरं नयति ।)

(८म दृश्यम्)

(चिदम्बरपीठे पण्डिताः जल्पन्ति)

१म पण्डितः— अहो विद्वत्ता पतञ्जलेः । अल्पवयस्यपि सर्वशास्त्रवित्त्वम् ।

२यः — गोणिकया मात्रा भाषितं यदयं शेषस्यावतारः । क्षुद्रसर्पाकारेण अञ्जलौ पतितः सन् संस्कृतेन कथारम्भं चक्रे तया सह सहसा मनुष्यशिशुवपुषा ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

३यः — जगद्वैचित्र्यात् सर्वं सम्भवति। अनन्ताः। खलु ईश्वरशक्तयः। स्तम्भादेवाबिर्भूतः नरसिंहः हिरण्यं विदारयामास क्षणेन।

१मः — उच्यते जनैः नटराजप्रसादात् लुप्तप्रायस्य पाणिनीयव्याकरणस्य कात्यायनवार्त्तिकपरिपुष्टस्य सामञ्जस्यं न्यायबीजेन विधाय महाभाष्यं रचितमनेन असाधारणपाण्डित्यं प्रकाशयन्। शताध्यायसम्बलितोऽयं ग्रन्थः तत्संख्यकदिवसैरेव पाठितोऽनेन। अह्ना पाठितत्वात् ग्रन्थस्याध्यायं आह्निकमिति वदन्ति तत्शिष्याः।

२यः — न केवलं तत्। महायोगी असौ योगाभ्यासस्य दार्शनिकतापि साधितवान् चतुष्पादैः सूत्राणि बिरच्ये। हिरण्यगर्भेण प्रवर्त्तमानस्य सांख्यशास्त्रस्य साधनप्रधानाङ्ग सेश्वरसांख्यं योगशास्त्राख्यं सङ्कलितमनेन बिशुद्धव्याकरणेन पदार्थानि स्थिरीकृत्य। कामशास्त्रेऽपि अस्यावदानमस्त्येव चूर्णिकाकृतः।

३यः — श्रुयते वैद्यकशास्त्रमपि प्रतिसंस्कृतमनेन। आकुमारिकायाः गान्धारं यावत् समग्रं भारतवर्षं परिक्रान्तमनेन। भ्रष्टशेषोऽयं नटराजस्य ताण्डवं दृष्ट्वा तत्प्रसादेन तदाज्ञया च महाभाष्यं रचयित्वा छात्रान् पाठयति।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

२यः — भद्रेदेवं । नोचेत् कथं सहस्रछात्रान् बृद्धानपि भोजनं दत्वा पाणिनीयव्याकरणं पाठयति । परन्तु ते छात्राः पठन्तोऽपि यवनिकया व्यबहिताः सन्तः तद्रूपं द्रष्टुं न शक्नुबन्ति अध्यापनावसरे ।

३यः — तथापि ते ओदनपाणिनीयाः इति जनैराख्याताः ।

१मः — देशोऽयं धन्यः ईदृशं महापुरुषं धारयन् ।

२यः — बयमपि धन्याः शेषदेबस्य मनुजाबतारं दृष्ट्वा ।

३यः — पूर्वं स पातालमासाद्य साक्षात् भुजगेश्वरात् शब्दशास्त्रं अधीतवान् इति श्रुतं मया महात्मनां मुखादपि । तदंशत्वात् एव एवं सम्भवति ।

१मः — अर्बाचीनोऽपि नमस्योऽस्ति अस्माभिरपि बृद्धैः । भाष्येऽनुक्तानि पदानि असिद्धानि भवन्येव इतःपरं ।

सर्बे — "पतञ्जलिमहाभाष्य चरकप्रतिसंस्कृतैः
मनोबाक्कायदोषाणां हन्त्रेऽहिपतये नमः ।"

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(९ म दृश्यम्)

(विद्यालये छात्रा उपविष्टा । पतञ्जलेः प्रवेशः । प्रणमन्ति सर्वे)

पतञ्जलिः —विद्यार्थिनः । महाभाष्येषु यूयं निष्णाताः संजाताः । तथापि मनसि वर्त्तमानानां संशयानां निराकरणं करणीयं युष्माभिः । यस्यापि मनसि यथा शङ्का वर्त्तन्ते ताः दूरीकरिष्यामि । पाणिनीयव्याकरणस्य वार्त्तिकपरिपुष्टस्य महाभाष्येसम्बलितव्याख्यया संगतिं विधाय लोके प्रचारः कर्त्तव्यः युष्माभिः स्वशक्त्या मदनन्तरम् । यवनिकां पातय । न कोऽपि मां पश्येत् यवनिकामुत्सार्य्य । एवं कृते ममाप्रसादः स्यादेव । (तथा कुर्वन्ति । यवनिकान्तराले पतञ्जलिः स्वरूपमास्थाय सहस्रफणायुक्तमुखेन शास्त्रं वदति ।)

शिष्याः — (स्वं) कथमेवं सतर्कतया आदेशः ?

पतञ्जलिः —तत् तर्हि वक्तव्यं ? न वक्तव्यं ? किं वक्तव्यम् । न क्षीयते न क्षरतीति वा अक्षरम् । सोऽयमक्षरसमाम्नायः वाक्समाम्नायः पुष्पितः फलित श्चान्द्रतारकवत् प्रतिमण्डितः वेदितव्यो ब्रह्मराशिः । स्फोटः शब्दध्वनिः शब्दगुणः । ध्वनिः स्फोटश्च शब्दानां अर्थप्रकाशकस्येत् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

१म शिष्यः— बिभिन्नबिषये बिभिन्नछात्राणां शङ्कासु स्थितासु कथं युगपत् सर्बेषां शङ्कासमाधानं गुरुणा क्रियते। किञ्चत् वैचित्र्यमस्त्येव।

पतञ्जलिः— किं बक्तव्यं? स्पष्टमेब सर्बं। अग्निरत्र अगन्इ वण्णांनां समाहारेऽपि तेषां पृथक् उच्चारणेन अर्थबोधो न स्यात्। समाहारेऽपि पूर्बपूर्बवण्णांनां क्रमोच्चारणानन्तरं तत्तदक्षरस्यनाशो भबत्येव। तथापि बण्णांनां नाशेऽपि येनार्थबोधः भबति तदेव स्फाटः। स्फुटत्यर्थोऽस्मादित स्फोटः। स एव नित्यः। शब्दानामपि चतुर्बिधार्थाः-गुणक्रिया-द्रव्याकृतय इति।

२य शिष्यः— लोकाः जल्पन्ति सहस्रमुखधारी शेषोऽयम्। तद् भबेद् वा। परन्तु तत्वं बेदितुं वासना बलवती भबति। किं करोम्यत्र। गुरोरप्रसादः भबति यबनिकाभेदने।

३य शिष्यः— मृत्योरधिका वा बिपत्तिः स्याद् वा। मृतोऽपि तत्वं बेदितुमिच्छामि। (सहसा यबनिकाया उत्सारणं स्वरूपेस्थितस्य शेषस्य दुःसहतेजसा सर्बे ते तत्क्षणादेव भस्मत्बमागताः।)

पतञ्जलिः— अहो बिपत्तिः पुत्राणां। त्वरितं मानुषरूपेण भबितव्यं। कोऽथमागच्छति। मत्शिष्य एव। कथं अबशिष्टः। (पूर्बमनुष्यरूपधारणम्)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Siddhanta eGangotri Gyaan Kosha

शिष्यः — अत्रास्य प्रणमति (चित्रवत्) कुत्र गताः सतीर्थाः ।
एकोऽपि त दृश्यते ।

पतञ्जलिः— कुत्र पलायितं त्वया एतावता पठनावसरेऽपि ।

शिष्यः — अत्रास्थितः श्रुतवानेव भवद्भाषितं । परन्तु
सहसा गभीरतृषावेशात् जलपानाय गतोऽभूत् ।

पतञ्जलिः— मदनुमतिं विनापि पलायनं पाठनमध्येऽपि ।
मूर्खत्वात् ब्रह्मराक्षसयोनिं माप्नुहि सत्वरम् ।

शिष्यः — (पदे प्रणमति अनुनयेन स्तुतिवाक्येन)
क्षमस्व मां । क्षमस्व मेऽपराधान् ।

पतञ्जलिः — विनयेन ते प्रसन्नोऽस्मि । मद्वाक्यमन्यथा न
भवेदेव । अत्र वृक्षे स्थातव्यं ते ब्रह्मराक्षसवपुषा ।
यः कोऽपि वृक्षमूलं प्राप्तः 'पचेर्निष्ठायां किम्'
इति प्रष्टव्यः सः । पक्वमिति वदिष्यन्तमेव
पाणिनीयशास्त्रज्ञं विदित्वा महाभाष्यं पाठयः ।
अनन्तरं मोक्षस्ते स्यादेव ।
(पतञ्जलेरन्तर्द्धानं तत्स्थानात्)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(१०म दृश्यम्)

(गोनर्द्द देशे पतञ्जलिः । मातरं प्रणमति)

गोणिका — कालान्ते आगतोऽसि बत्स । अत्र स्थातव्यं ते ममान्तकालं यावत् । तदप्यासन्नमिवाभाति ।

पतञ्जलिः— अवश्यं करिष्याम्येवम् ।

गोणिका — दिनानि पुत्राय संप्रार्थ्य भगवन्तं वृषध्वजं त्वां पुत्ररूपेण प्राप्तवती । विवाहं कारयित्वा ते नप्तृमुखदर्शने बासना आसीदेव । परन्तु मम काल आसन्न एव ।

पतञ्जलिः— मातः नहिमे रोचते गृहसौख्यं । तीर्थानि निषेव्य तपःसाधने बांछाबद्धं ते ।

गोणिका — किं पुन स्तीर्थे स्तपसा बा । त्वया तु तीर्थसकलं भ्रमित मिति कथ्यते जनैः । अध्वराश्च कृतास्त्वया । मगधराजस्य पुष्पमित्रस्य अश्वमेधयज्ञेऽपि पौरोहित्यं आचरितं त्वया इति श्रुतं मया । परन्तु यवनानां प्राबल्येऽपि अश्वमेधः कथं विहतस्तेन ।

पतञ्जलिः— यवनाक्रान्तेऽपि आर्यावर्त्ते पुष्पमित्रस्य वीरपुत्रैः यवनसेनापतेः मिलिन्दस्य पराजयात् । एवं तत्सम्भवति स्म । गृहयुद्धस्य वार्त्तांप्राप्य यवनाधिपतौ स्वदेशं पलायिते सति सेनापतिः मिलिन्दः माध्यमिकां पाटलीपुत्रं च आक्रान्तवान् परन्तु

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

पुष्पमित्रेण आक्रमणस्य निराकरणं कृतमेव सैन्यैः सह ।

गोणिका— श्रुयते त्वं पाणिनेः सूत्राणां कात्यायनवार्त्तिकानां च समन्वयः कृतवानसि महाभाष्यं विधाय । पाणिनिदेशः वीक्षितः किमु त्वया ?

पतञ्जलिः— गतवानेव । तत्रापि पाणिनेः धातुमूर्त्तिरेव अवशिष्यते । तस्य कृतेस्तु प्रचारो नासीदेव । तस्मात् दुःखितोऽहं महामतेः पाणिनेः अष्टाध्यायी-व्याकरणस्य वार्त्तिकया विरोधं परिहर्त्तुं स्थिरीकृतवान् । नटराजोऽपि तदर्थमेव मां प्रेरितवान् पूर्वमपि ।

गोणिका — साधु कृतं त्वया । कृतिस्ते तिष्ठतु चिराय । पाणिनिरपि जीवतु चिराय भारतेऽस्मिन् तत्शास्त्र-प्रचारात् सह कुशाग्रधिया वाक्यकारेण ।

—★—

(११श दृश्यम्)

(वृक्षे वसति राक्षसः)

राक्षसः — कालात् स्थितोऽहमत्र वृक्षमुपरि क्षुत्तृषया पीडतः । सर्वेऽपि आगन्तुका अपाणिनीया एव । गुरोर्भाषितं कदा सफलीभविष्यति वा । एष

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

काश्चित् तरुणः पान्थः समागच्छति । वेशेन रूपेण च विप्र इत्यनुमीयते । अनेन मोक्षः स्याच्चेन् मे ।

(विप्र आगत्य वृक्षमूले उपविशति क्लान्तिहरणाय)

विप्रः — देशाः भ्रमिताः वर्षाणि यावत् । चिदम्बरक्षेत्रमपि भ्रमितं । न कोऽपि पतञ्जलेः समाचारं दातुं शक्नुवन्ति का कथा भाष्यशिक्षायाः ।

राक्षसः — कस्त्वं ? व्याकरणशिक्षार्थी वर्त्तसे ननु । नोचेत् कथं पतञ्जलेः अन्वेषणं । एवं चेत् ब्रुहि "पचेः निष्ठायां किं रूपम्" ।

विप्रः — पक्वम् ।

राक्षसः — आः पाणिनीयनिष्णातोऽसि । पतञ्जलेः शिष्योऽहं तदभिशापात् ब्रह्मराक्षसत्वमाप्नुय तिष्ठाम्यत्र कालात् । तदाज्ञया त्वामहं तत्कृतमहाभाष्यस्य शिक्षां प्रदाय मुक्तो भविष्यामि दुष्टयोनेः । कस्त्वम् ?

विप्रः — चन्द्राचार्य्योऽहं । महाभाष्यशिक्षेच्छयैव पतञ्जलिं मार्गयमाणः विचरामि कालात् सुदूरात् आगत्य काश्मीरदेशात् । दिष्ट्या सन्देशो लब्धः त्वत्तः कार्य्यसिद्धिश्च ।

राक्षसः — तर्हि शाबधानतया गृहाण अत्र स्थित्वा दिनानि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अश्वत्थपत्रे लिखित्वा पातयामि पत्राणि भूमौ ।
संगृह्य लिखितव्यं त्वया संबुद्धेन ।

विप्रः — एवं करिष्ये ।

(ब्रह्मराक्षसस्य नखेन पत्रेषु लिखनं भूमौ पातनं च ।
चन्द्राचार्येण संग्रहः ।)

राक्षसः — विप्र ! बुध्वा एव शास्त्रमुद्धरस्व । अथ शब्दानुशासनम् ।

विप्रः — परन्तु प्रथमतः कथं शब्द उप्तनोऽभवत् । मनुष्येन देवेन वा ।

राक्षसः — आदौ शब्दः अखण्ड आसीदेव । देवराजेन इन्द्रेण प्रकृतिप्रत्ययविधानात् विकारः विहित एव । स तु ब्रह्मणा शिक्षितबृहस्पतेरेव व्याकरणमधीतवान् इति परंपरा । अहह तत्र पत्राणि खादति अजापि । अरे विप्र । तवासावधानतया एव इत्थं संघटितं । भाष्यं खण्डितं सजातम् ।

विप्रः — क्व मे दोषः ? प्रभूतानि पत्राणि पातितानि त्वया । कथं संग्रहः भवेत्तेषां मया एकाकिना ।

राक्षसः — तर्हि लेखनकाले अप्राप्यविषयवस्तुस्थलेषु मण्डलाकारं चिह्नं दत्वा "अजाभक्षितमेतत्" इति सूचितव्यं तत्र तत्र ।

विप्रः — क्वचित् पत्रेषु त्वयापि लिखितं "फणी फणंफणायते" । तत्रापि विषयवस्तुनः अभावः परिलक्ष्यते ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

राक्षसः — अत्र न मे दोषः । सहस्रफणाभिः शेषावतारेण पतञ्जलिना ऋषिणा अध्यापनां कृता युगपत् अशेषान् अपि शिष्यान् । मध्ये मध्ये अश्रुतं जातं तत् कथनं । जिज्ञासायां अवकाशोऽपि नासीत् तदानीं यवनिकान्तराले वर्त्तमानत्वात् तस्य । न हानिः तत्र । कथञ्चित् पठनं समुद्धरणं च कारितं मया महाभाष्यस्य । समये स्वदेशे अन्यत्रापि शिष्यपरम्पराक्रमेण प्रचारय । पुनर्लोपेऽपि महावैयाकरणो महायोगी भर्त्तृहरिः अर्थान् प्रकाशयिष्यसि एव । मुक्तोऽहमधुना गच्छामि स्वर्गं । स्वस्ति भूयात् ते ।

विप्रः — (विस्मयात्) अहो सत्यमेव मुनिभाषितं ।
"एकः शब्दः सम्यग्ज्ञातः सुष्ठुप्रयुक्तः स्वर्गलोके कामधुक् भवतीति ।"

(१२श दृश्यम्)

(नर्मदातटे ॐकारसानौ पतञ्जलिः)

पतञ्जलिः — अम्बायां गोणिकायां दिवंगतायां व्याकरणयोगवैद्यकनामशास्त्ररचनाप्रचारानन्तरं नहि मे कार्य्यमवशिष्यते किञ्चिदपि । किं प्रयोजनं भूयोऽनेन शरीरेण वा । (सहसा आकाशवाणी) पतञ्जले ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

महामुनेः गौडपादस्य शिष्यत्वं स्वीकृत्य नारायणीयधर्मपरम्परापि प्रचारितव्या त्वया। धर्मस्थापनाय स्वयं शङ्करोऽपि आगमिष्यति भूतलं मनुष्यरूपेण। तस्यापि गुरुत्वं त्वमर्हस्येव। तदवधि स्थातव्यं ते।

पतञ्जलिः— आः भगवतः विरूपाक्षस्य मनुजावतारः। दिदृक्षुरेवाहं तं मनुष्यत्वसफलीकरणाय। तर्हि स्थास्याम्यत्र अनेन शरीरेण महासमाधिना गोविन्दपादनाम्ना। श्रीगौडपादस्य साक्षात्करणानन्तरं इदं शरीरमपि रसायनपद्धत्या अजरामरं करणीयं मे। तस्मात् अत्रैव रसायनप्रयोगे परीक्षा करणीया दिनानि येन रसशास्त्रेऽपि ग्रन्थं करिष्ये लोकहिताय।

— ● —

(१३वं दृश्यम्)

(हिमालये अत्रिमुनियज्ञस्थले व्यासगोविन्दपादानां समावेशः। व्यासस्य ब्रह्मसूत्रार्थव्याख्यानं।)

व्यासः — अथ ब्रह्मजिज्ञासायां सतां साधनसम्पन्नानां ब्रह्मणः स्वरूपं द्वितीयसूत्रे एव निरूपितं अनिर्वाच्यमपि वचसा- "जन्माद्यस्य यतः।"

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

गोबिन्दपादः— भगवन् परमगुरुणा भवता बेदनिकरः प्रबिभक्तः रचितं महाभारतं, पुराणानि च लिखितानि। योगशास्त्रमपि सम्यग्भाषितं। ब्रह्मसूत्रमपि सूत्रितं। परन्त्वत्र ब्रह्मसूत्रबिषये केचित् बिप्रतिपन्नाः अयथार्थान् चिन्तयन्ति तस्य दुर्ग्रहत्वात्। अतः भगबता ब्रह्मसूत्रस्य अन्यथाग्रहणनिग्रहदक्षं भाष्यमेकं करणीयं कृपया लोकमङ्गलायेति।

व्यासः — (बिहस्य) बिषयोऽयं स्वयमीश्वरेण प्रागेव निरूपित आस्ते। बत्स! मत्समः समस्तशास्त्रबिबेकः शिष्यस्तब भबिष्ययेब समये यः क्षुद्रमृतकुम्भेऽपि नर्मदायाः प्रबृद्धं जलमपि संहरिष्यति। स एव दुर्गतानि खण्डयिष्यति। शर्मदायिभाष्यं च निर्माय ब्रह्मसूत्रस्य, लोके तबैव यशांसि ख्यापयिष्यति शिष्यत्वात्। तदागमनमपेक्षमाणः तिष्ठानेन शरीरेण।

गोबिन्दपादः— यथाज्ञापयन्ति परमगुरुबः। इत्थमेब बांछामपि मद्गुरोः श्री गौडपादस्य तर्कयेऽहम्।

(व्यासस्य प्रस्थानम्)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(१४श दृश्यम्)

(नर्मदातटे गोबिन्दनाथबने मुनिसन्निविष्टे बालकशंकरस्य प्रवेशः)

शङ्करः — कुत्र पश्येयं योगीन्द्रं गोबिन्दपादम् ?

मुनयः — कस्त्वम् ? बाल्येऽपि संसारं त्यक्तवानसि वैराग्यात् । कस्मादत्रागतः ?

शङ्करः — गोबिन्दनाथं दिदृक्षुरहमत्रागतः । कृपया कथयन्तु भवन्तः तद् विषयं ।

मुनयः — अमुष्मिन्नेब गह्वरे यत्र क्षुद्रं छिद्रमेकं दृश्यते तदन्तरे आस्ते भगवान् गोबिन्दपादः महासमाधिना आसहस्रवर्षात् । तमेव दिदृक्षवः वयमिव अनेकेऽपि मुनयः स्थिताः गताश्चात्र ।

शङ्करः — (गुहायाःत्रिः प्रदक्षिणं कृत्वा)

" पर्य्यङ्कतां भजति यः पतगेन्द्रकेतोः
पादाङ्गदत्वमथवा परमेश्वरस्य
तस्यैव मूर्ध्नि धृतसाब्धिमहीध्रभूमेः
शेषस्य बिग्रहमशेषमहं भजे त्वाम् ॥
दृष्ट्वा पुरा निजसहस्रमुखी मभैषु
रन्तेबसन्त इति तामपहाय शान्तः
एकाननेन भुबि यस्त्वबतीर्य्य शिष्यान्
अन्वग्रहीन्मनु स एव पतञ्जलिस्त्वम् ॥

CC-0. Panini Kanya Maha Vidyalaya Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

उरगपतिमुखादधीत्य साक्षात्
स्वयमबनेर्बिबरं प्रबिश्य येन
प्रकटित मचलातले सयोगं
जगदुपकारपरेण शब्दभाष्यम् ॥
तमखिल गुणपूर्णं व्यासपुत्रस्य शिष्यात्
अधिगतपरमार्थं गौडपाबान् महर्षेः
अधिजिगमिषुरेष ब्रह्मसंस्था महं त्वां
प्रसृमरमहिमानं प्रापमेकान्तभक्त्या ॥"

गोबिन्दः — (स्तुत्या समाधिभङ्गात्) कस्येमानि स्तुतिपदानि ? व्यासबाक्यं फलितं किमु ? नोचेत् कस्य सामर्थ्यं मत्समाधिभङ्गे ? गुहाद्वारसामाद्य ज्ञातव्यम् । (द्वारि तिष्ठन्) कस्त्वं ? किमर्थं स्तौषि मां ?

शङ्करः — (प्राञ्जलिः)

"स्वामिन्नहं न पृथिबी न जलं न तेजो
न स्पर्शनो न गगनं नच तद् गुणा वा
नापीन्द्रियाण्यपि तु बिद्धि ततोऽबशिष्टः
यः केवलोऽस्ति परमः स शिबोऽह मस्मि ॥"

लोकाः मां शङ्करइति व्याहरन्ति । केरलादा गतोऽहम् ।

गोबिन्दः— (स्व) शिशुत्वेऽपि अद्वैतं ग्राहयति मामपि । पश्येयं कोऽयम् । (समाधिदृष्ट्या शङ्करं शङ्करं ज्ञात्वा प्रोक्तम्) मृषाबलादगतोऽसि किमु ?

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

शङ्करः — एव। (गुहान्तिकं गत्वा प्रणम्य पादौ पूजयति)

गोबिन्दः — बत्स! सर्वं जानामि ते चरितं। त्वां महावाक्यानां उपदेशमहं करिष्यामि परन्तु सन्यासप्रदानानन्तरमेव। अस्मद्गुरुपरम्परा नारायणादारभ्य व्यास-पुत्रस्यशिष्यश्रीगौडपादपर्य्यन्तमेव। अनन्तात् प्राप्तशब्दाम्बुराशिं सह योगेन त्वामेव ग्राहयिष्यामि।

शङ्करः — कृतार्थोऽहं गुरुपादानां दर्शनेनैव।

(१५म दृश्यम्)

(गुहायां समाधिस्थः गोबिन्दपादः प्रावृट्कालत्वात् सहसा नर्मदायां बन्या। शङ्कर इतस्ततः पश्यति)

शङ्करः — अहो नर्मदा प्रवृद्धा कूलमतिक्रामति। अनतिबिलम्बेन गह्वरं प्लावितभवत्येव। भगवत्पादानां का दशा भविष्यति तर्हि किं करोमि? अयि नर्मदे! मैत्रं कुरु। योगीन्द्रस्य समाधौ विघ्नं न विधेयं भवत्या। अन्यथा करकेऽस्मिन् अभिमन्त्रणं कृत्वा विवृद्धमम्भः संहरिष्यामि स्वकराभ्यां कुम्भसम्भव इव। (तथा करोति। गुरोः व्युत्थानम्)

मुनयः — भगवन्! अद्भुतकर्मायं बालसन्यासी। मन्त्रबलेन नर्मदायाः विवृद्धं जलमपि कलसे उपसंहृतमनेन।

गोबिन्दः — ज्ञातं। ज्ञातं मयापि योगसिद्धिः संजातास्य मत्प्रसादात्।

Contact: Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(शङ्कर आगत्य प्रणमति) वत्स । प्रसन्नोऽहं ते विनयेन सेवया स्वभावेन साधनसिध्यापि । धारणादिभिः वर्षाकालमत्रापनीय वेदकदम्बकोद्भवां तत्वपद्धतिं विवेक्तु हरपुरीं वाराणसीं प्रयाहि । सौम्य ! त्व मुत्तमपुरुषोऽसि । तत्ववित्प्रवरोऽपि वर्त्तसे । नान्येन तुल्यस्त्वम् । अतः जगदुद्धरणाय निरवद्य निवन्धान् विरचय । अत्र तव दीक्षा शिक्षा च समासा इव । कार्य्यं मम.पि नावशिष्यते । सकलसिद्धयः त्वयि विशन्तु मत्प्रसादात् । सनातन -धर्मस्य रक्षणाय एव ते जन्म इति श्रीगौडपादेन महात्मना प्रागुक्तं । वाराणस्यां वसति त्वयि आद्यदेवः शङ्करः अनुग्रहात् तुभ्यं दर्शनं दास्यति एव । अनन्तरं श्रीविश्वनाथस्य आज्ञा पालनीया त्वया ।

ॐ सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामया
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ॥
ॐ शान्तिः । ॐ शान्तिः । ॐ शान्तिः ।

(गोविन्दस्य गुहाप्रवेशः)

सर्वे — ॐ नारायणं पद्मभवं वशिष्ठ शक्तिं च तत्पुत्र-
पराशरं च । व्यासं शुकं गौडपादं महान्तं
गोविन्दनाथं प्रणताः त्रिसन्ध्यम् ॥

नेपथ्ये — "योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य च वैद्यकेन
अपाकरोद् यः प्रवरो मुनीनां
पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥"

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

(१६श दृश्यम्)

(विद्यालये छात्राध्यापकाः)

अध्यापकः— विद्यार्थिनः । लब्धं ननु प्रश्नानामुत्तरं इदानीम् ।

छात्राः — बाढम् । बाढम् ।

अध्यापकः— एवं प्रभावास्ते मुनय आसन्नेव । दिष्ट्या वयं भोक्तार एव तेषां तपसां फलानि । अतः मुनित्रयं नमस्कृत्य एव प्रवर्त्तते व्याकरणशास्त्रपाठः पूर्वाचार्य्याणां । तथैवाचरितं भट्टोजिदीक्षितेन तस्य सिद्धान्तकौमुदीग्रन्थारम्भे—

ॐ मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ।

"अनुकरणं हि शिष्टस्य साधुर्भवति, अशिष्टाप्रतिषिद्धस्य वा, नैव तद्दोषाय भवति, नाभ्युदयाय ।" प्रश्नान्तराणां सविशेषमुत्तरं क्रमशः स्वतो विज्ञेयं युष्माभिः ।

छात्राः — वयमपि शिष्टानुकरणं करिष्याम एव ।

"अस्तु नमः पाणिनये भूयो मुनये तथास्तु वररुचये
किञ्चास्तु पतञ्जलये शब्दब्रह्मात्मने च धूर्जटये ।"

इति शम् । श्रीश्रीगुरवेऽर्पितमस्तु

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection.